श्रीमद्वाग्भटविरचिते
अष्टाङ्गहृदये चिकित्सितस्थानम्
प्रथमोऽध्यायः

अथातो ज्वरचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
आमाशयस्थो हत्वाऽग्निं सामो मार्गान् पिधाय यत्
विदधाति ज्वरं दोषस्तस्मात्कुर्वीत लङ्घनम् १
प्राग्रूपेषु ज्वरादौ वा बलं यत्नेन पालयन्
बलाधिष्ठानमारोग्यमारोग्यार्थः क्रियाक्रमः २
लङ्घनैः क्षपिते दोषे दीप्तेऽग्नौ लाघवे सति
स्वास्थ्यं क्षुत्तृड् रुचिः पक्तिर्बलमोजश्च जायते ३
तत्रोत्कृष्टे समुत्क्लिष्टे कफप्राये चले मले
सहृल्लासप्रसेकान्नद्वेषकास विषूचिके ४
सद्योभुक्तस्य सञ्जाते ज्वरे सामे विशेषतः
वमनं वमनार्हस्य शस्तं कुर्यात्तदन्यथा ५
श्वासातीसारसम्मोह हृद्रोगविषमज्वरान्
पिप्पलीभिर्युतान् गालान् कलिङ्गैर्मधुकेन वा ६
उष्णाम्भसा समधुना पिबेत्सलवणेन वा
पटोलनिम्बकर्कोटवेत्रपत्रोदकेन वा ७
तर्पणेन रसेनेक्षोर्मद्यैः कल्पोदितानि वा
वमनानि प्रयुञ्जीत बलकालविभागवित् ८
कृतेऽकृते वा वमने ज्वरी कुर्याद्विशोषणम्
दोषाणां समुदीर्णानां पाचनाय शमाय च ९
दोषेण भस्मनेवाग्नौ छन्नेऽन्न न विपच्यते
तस्मादादोषपचनाज्ज्वरितानुपवासयेत् १०
तृष्णगल्पाल्पमुष्णाम्बु पिबेद्वातकफज्वरे
तत्कफं विलयं नीत्वा तृष्णामाशु निवर्तयेत् ११
उदीर्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत्
लीनपित्तानिलस्वेदशकृन्मूत्रानु लोमनम् १२
निद्राजाड्यारुचिहरं प्राणानामवलम्बनम्

© 2003 Cosmic Software and Vedic Engineering. This text is made available exclusively for on-line use, and for printing individual copies for personal use. Distribution of hard copies, or distribution of electronic files via the internet is expressly prohibited. For licensing, and for an editable text version on CD-ROM, please contact cssetzer@yahoo.com.

विपरीतमतः शीतं दोषसङ्घातवर्द्धनम् १३
उष्णमेवंगुणत्वेऽपि युञ्ज्यान्नैकान्तपित्तले
उद्रिक्तपित्ते दवथुदाहमोहातिसारिणि १४
विषमद्योत्थिते ग्रीष्मे क्षतक्षीणेऽस्रपित्तिनि
घनचन्दनशुण्ठ्यम्बुपर्पटोशीरसाधितम् १५
शीतं तेभ्यो हितं तोयं पाचनं तृड्ज्वरापहम्
ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना १६
तस्मात्पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकम्
स्नानाभ्यङ्गप्रदेहांश्च परिशेषं च लङ्घनम् १७
अजीर्ण इव शूलघ्नं सामे तीव्ररुजि ज्वरे
न पिबेदौषधं तद्धि भूय एवाममावहेत् १८
आमाभिभूतकोष्ठस्य क्षीरं विषमहेरिव
सोदर्दपीनसश्वासे जङ्घापर्वास्थिशूलिनि १९
वातश्लेष्मात्मके स्वेदः प्रशस्तः स प्रवर्तयेत्
स्वेदमूत्रशकृद्वातान् कुर्यादग्नेश्च पाटवम् २०
स्नेहोक्तमाचारविधिं सर्वशश्चानुपालयेत्
लङ्घनं स्वेदनं कालो यवाग्वस्तिक्तको रसः २१
मलानां पाचनानि स्युर्यथावस्थं क्रमेण वा
शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् २२
नेष्यते तेषु हि हितं शमनं यन्न कर्शनम्
तत्र सामज्वराकृत्या जानीयादविशोषितम् २३
द्विविधोपक्रमज्ञानमवेक्षेत च लङ्घने
युक्तं लङ्घितलिङ्गैस्तु तं पेयाभिरुपाचरेत् २४
यथास्वौषधसिद्धाभिर्मण्ड पूर्वाभिरादितः
षडहं वा मृदुत्वं वा ज्वरो यावदवाप्नुयात् २५
तस्याग्निर्दीप्यते ताभिः समिद्भिरिव पावकः
प्राग्लाजपेयां सुजरां सशुण्ठीधान्यपिप्पलीम् २६
ससैन्धवां तथाऽम्लार्थी तां पिबेत्सहदाडिमाम्
सृष्टविड् बहुपित्तो वा सशुण्ठीमाक्षिकां हिमाम् २७
बस्तिपार्श्वशिरःशूली व्याघ्रीगोक्षुरसाधिताम्

पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः २८
सिद्धां ज्वरातिसार्यम्लां पेयां दीपनपाचनीम्
ह्रस्वेन पञ्चमूलेन हिक्कारुक्श्वासकासवान् २९
पञ्चमूलेन महता कफार्तो यवसाधिताम्
विबद्धवर्चाः सयवां पिप्पल्यामलकैः कृताम् ३०
यवागूं सर्पिषा भृष्टां मलदोषानुलोमनीम्
चविकापिप्पलीमूल द्राक्षामलकनागरैः ३१
कोष्ठे विबद्धे सरुजि पिबेत्तु परिकर्तिनि
कोलवृक्षाम्लकलशीधावनीश्रीफलैः कृताम् ३२
अस्वेदनिद्रस्तृष्णार्तः सितामलकनागरैः
सिताबदरमृद्वीकासारिवामुस्तचन्दनैः ३३
तृष्णाच्छर्दिपरीदाहज्वरघ्नीं क्षौद्रसंयुताम्
कुर्यात्पेयौषधैरेव रसयूषादिकानपि ३४
मद्योद्भवे मद्यनित्ये पित्तस्थानगते कफे
ग्रीष्मे तयोर्वाऽधिकयोस्तृट्छर्दिर्दाहपीडिते ३५
ऊर्ध्वं प्रवृत्ते रक्ते च पेयां नेच्छन्ति तेषु तु
ज्वरापहैः फलरसैरद्भिर्वा लाजतर्पणान् ३६
पिबेत्सशर्कराक्षौद्रांस्ततो जीर्णे तु तर्पणे
यवाग्वां वौदनं क्षुद्वानश्नीयाद्भृष्टतण्डुलम् ३७
दकलावणिकैर्यूषै रसैर्वा मुद्गलावजैः
इत्ययं षडहो नेयो बलं दोषं च रक्षता ३८
ततः पक्वेषु दोषेषु लङ्घनाद्यैः प्रशस्यते
कषायो दोषशेषस्य पाचनः शमनोऽथवा ३९
तिक्तः पित्ते विशेषेण प्रयोज्यः कटुकः कफे
पित्तश्लेष्महरत्वेऽपि कषायः स न शस्यते ४०
नवज्वरे मलस्तम्भात्कषायो विषमज्वरम्
कुरुतेऽरुचिहृल्लासहिध्माध्मानादिकानपि ४१
सप्ताहादौषधं केचिदाहुरन्ये दशाहतः
केचिल्लघ्वन्नभुक्तस्य योज्यमामोल्बणे न तु ४२
तीव्रज्वरपरीतस्य दोषवेगोदये यतः

दोषेऽथवाऽतिनिचिते तन्द्रास्तैमित्यकारिणि ४३
अपच्यमानं भैषज्यं भूयो ज्वलयति ज्वरम्
मृदुर्ज्वरो लघुर्देहश्चलिताश्च मला यदा ४४
अचिरज्वरितस्यापि भेषजं योजयेत्तदा
मुस्तया पर्पटं युक्तं शुण्ठ्या दुःस्पर्शयाऽपि वा ४५
पाक्यं शीतकषायं वा पाठोशीरं सवालकम्
पिबेत्तद्वच्च भूनिम्बगुडूचीमुस्तनागरम् ४६
यथायोगमिमे योज्याः कषाया दोषपाचनाः
ज्वरारोचकतृष्णास्यवैरस्यापक्तिनाशनाः ४७
कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी ४८
पटोलं सारिवा मुस्ता पाठा कटुकरोहिणी
पटोलनिम्बत्रिफला मृद्वीकामुस्तवत्सकाः ४९
किराततिक्तममृता चन्दनं विश्वभेषजम्
धात्रीमुस्तामृताक्षौद्रमर्ध श्लोकसमापनाः ५०
पञ्चैते सन्ततादीनां पञ्चानां शमना मताः
दुरालभामृतामुस्तानागरं वातजे ज्वरे ५१
अथवा पिप्पलीमूलगुडूचीविश्वभेषजम्
कनीयः पञ्चमूलं च पित्ते शक्रयवाघनम् ५२
कटुका चेति सक्षौद्रं मुस्तापर्पटकं तथा
सधन्वयासभूनिम्बं वत्सकाद्यो गणः कफे ५३
अथवा वृषगाङ्गेयीशृङ्गवेरदुरालभाः
रुग्विबन्धानिलश्लेष्मयुक्ते दीपनपाचनम् ५४
अभयापिप्पली मूलशम्याककटुकाघनम्
द्राक्षामधूकमधु करोध्रकाश्मर्यसारिवाः ५५
मुस्तामलकह्रीबेरपद्म केसरपद्मकम्
मृणालचन्दनोशीर नीलोत्पलपरूषकम् ५६
फाण्टो हिमो वा द्राक्षादिर्जातीकुसुमवासितः
युक्तो मधुसितालाजैर्जयत्यनिलपित्तजम् ५७
ज्वरं मदात्ययं छर्दिं मूर्च्छां दाहं श्रमं भ्रमम्
ऊर्ध्वगं रक्तपित्तं च पिपासां कामलामपि ५८

पाचयेत्कटुकां पिष्ट्वा कर्परेऽभिनवे शुचौ
निष्पीडितो घृतयुतस्तद्रसो ज्वरदाहजित् ५९
कफवाते वचातिक्तापाठारग्वधवत्सकाः
पिप्पलीचूर्णयुक्तो वा क्वाथश्छिन्नोद्भवोद्भवः ६०
व्याघ्रीशुण्ठ्यमृताक्वाथः पिप्पलीचूर्णसंयुतः
वातश्लेष्मज्वर श्वासकासपीनसशूलजित् ६१
पथ्याकुस्तुम्बरीमुस्ता शुण्ठीकट्तृणपर्पटम्
सकट्फलवचाभार्ङ्गीदेवाह्वं मधुहिङ्गुमत् ६२
कफवातज्वरष्ठीवकुक्षि हृत्पार्श्ववेदनाः
कण्ठामयास्यश्वयथु कासश्वासान्नियच्छति ६३
आरग्वधादिः सक्षौद्रः कफपित्तज्वरं जयेत्
तथा तिक्तावृषोशीरत्रायन्तीत्रिफलामृताः ६४
पटोलातिविषानिम्ब मूर्वाधन्वयवासकाः
सन्निपातज्वरे व्याघ्रीदेवदारुनिशाघनम् ६५
पटोलपत्रनिम्बत्वक्त्रिफला कटुकायुतम्
नागरं पौष्करं मूलं गुडूची कण्टकारिका ६६
सकासश्वासपार्श्वार्तौ वातश्लेष्मोत्तरे ज्वरे
मधूकपुष्पमृद्वीकात्रायमाणा परूषकम् ६७
सोशीरतिक्तात्रिफलाकाश्मर्यं कल्पयेद्धिमम्
कषायं तं पिबन् काले ज्वरान् सर्वानपोहति ६८
जात्यामलकमुस्तानि तद्वद्धन्वयवासकम्
बद्धविट् कटुकाद्राक्षात्रायन्तीत्रिफलागुडम् ६९
जीर्णौषधोऽन्न पेयाद्यमाचरेत् श्लेष्मवान्न तु
पेया कफं वर्धयति पङ्कं पांसुषु वृष्टिवत् ७०
श्लेष्माभिष्यण्णदेहानामतः प्रागपि योजयेत्
यूषान् कुलत्थचणककलायादिकृतान् लघून् ७१
रूक्षांस्तिक्तरसोपेतान् हृद्यान् रुचिकरान् पटून्
रक्ताद्याः शालयो जीर्णाः षष्टिकाश्च ज्वरे हिताः ७२
श्लेष्मोत्तरे वीततुषास्तथा वाटीकृता यवाः
ओदनस्तैः स्रुतो द्विस्त्रिः प्रयोक्तव्यो यथायथम् ७३

दोषदूष्यादिबलतो ज्वरघ्नक्वाथसाधितः
मुद्गाद्यैर्लघुभिर्यूषाः कुलत्थैश्च ज्वरापहाः ७४
कारवेल्लककर्कोटबाल मूलकपर्पटैः
वार्ताकनिम्बकुसुमपटोल फलपल्लवैः ७५
अत्यन्तलघुभिर्मांसैर्जाङ्गलैश्च हिता रसाः
व्याघ्रीपरूषतर्कारीद्राक्षामलकदाडिमैः ७६
संस्कृताः पिप्पलीशुण्ठीधान्यजीरकसैन्धवैः
सितामधुभ्यां प्रायेण संयुता वा कृताकृताः ७७
अनम्लतक्रसिद्धानि रुच्यानि व्यञ्जनानि च
अच्छान्यनलसम्पन्नान्यनुपानेऽपि योजयेत् ७८
तानि क्वथितशीतं च वारि मद्यं च सात्म्यतः
सज्वरं ज्वरमुक्तं वा दिनान्ते भोजयेल्लघु ७९
श्लेष्मक्षयविवृद्धोष्मा बलवाननलस्तदा
यथोचितेऽथवा काले देशसात्म्यानुरोधतः ८०
प्रागल्पवह्निर्भुञ्जानो न ह्यजीर्णेन पीड्यते
कषायपानपथ्यान्नैर्दशाह इति लङ्घिते ८१
सर्पिर्दद्यात्कफे मन्दे वातपित्तोत्तरे ज्वरे
पक्वेषु दोषेष्वमृतं तद्विषोपममन्यथा ८२
दशाहे स्यादतीतेऽपि ज्वरोपद्रववृद्धिकृत्
लङ्घनादिक्रमं तत्र कुर्यादाकफसङ्क्षयात् ८३
देहधात्वबलत्वाच्च ज्वरो जीर्णोऽनुवर्तते
रूक्षं हि तेजो ज्वरकृत्तेजसा रूक्षितस्य च ८४
वमनस्वेदकालाम्बु कषायलघुभोजनैः
यः स्यादतिबलो धातुः सहचारी सदागतिः ८५
तस्य संशमनं सर्पिर्दीप्तस्येवाम्बु वेश्मनः
वातपित्तजितामग्र्यं संस्कारं चानुरुध्यते ८६
सुतरां तद्ध्यतो दद्याद्यथास्वौषधसाधितम्
विपरीतं ज्वरोष्माणं जयेत्पित्तं च शैत्यतः ८७
स्नेहाद्वातं घृतं तुल्यं योगसंस्कारतः कफम्
पूर्वे कषायाः सघृताः सर्वे योज्या यथामलम् ८८

त्रिफलापिचुमन्दत्वङ्मधुकं बृहतीद्वयम्
समसूरदलं क्वाथः सघृतो ज्वरकासहा ८९
पिप्पलीन्द्रयवधावनितिक्ता सारिवामलकतामलकीभिः
बिल्वमुस्तहिमपालनिसेव्यैर्द्राक्षयाऽतिविषया स्थिरया च ९०
घृतमाशु निहन्ति साधितं ज्वरमग्निं विषमं हलीमकम्
अरुचिं भृशतापमंसयोर्वमथुं पार्श्वशिरोरुजं क्षयम् ९१
तैल्वकं पवनजन्मनि ज्वरे योजयेत्त्रिवृतया वियोजितम्
तिक्तकं वृषघृतं च पैत्तिके यच्च पालनिकया शृतं हविः ९२
विडङ्गसौवर्चलचव्यपाठाव्योषाग्निसिन्धूद्भवयावशूकैः
पलांशकैः क्षीरसमं घृतस्यप्रस्थं पचेज्जीर्णकफज्वरघ्नम् ९३
गुडूच्या रसकल्काभ्यां त्रिफलाया वृषस्य च
मृद्वीकाया बलायाश्च स्नेहाः सिद्धा ज्वरच्छिदः ९४
जीर्णे घृते च भुञ्जीत मृदुमांसरसौदनम्
बलं ह्यलं दोषहरं परं तच्च बलप्रदम् ९५
कफपित्तहरा मुद्गकारवेल्लादिजा रसाः
प्रायेण तस्मान्न हिता जीर्णे वातोत्तरे ज्वरे ९६
शूलोदावर्तविष्टम्भजनना ज्वरवर्धनाः
न शाम्यत्येवमपि चेज्ज्वरः कुर्वीत शोधनम् ९७
शोधनार्हस्य वमनं प्रागुक्तं तस्य योजयेत्
आमाशयगते दोषे बलिनः पालयन्बलम् ९८
पक्वे तु शिथिले दोषे ज्वरे वा विषमद्यजे
मोदकं त्रिफलाश्यामात्रिवृत्पिप्पलिकेसरैः ९९
ससितामधुभिर्दद्याद्व्योषाद्यं वा विरेचनम्
लिह्याद्वा त्रैवृतं चूर्णं संयुक्तं मधुसर्पिषा
द्राक्षाधात्रीरसं तद्वत्सद्राक्षां वा हरीतकीम् १००
आरग्वधं वा पयसा मृद्वीकानां रसेन वा
त्रिफलां त्रायमाणां वा पयसा ज्वरितः पिबेत् १०१
विरिक्तानां च संसर्गी मण्डपूर्वा यथाक्रमम्
च्यवमानं ज्वरोत्क्लिष्टमुपेक्षेत मलं सदा १०२
पक्वोऽपि हि विकुर्वीत दोषः कोष्ठे कृतास्पदः

अतिप्रवर्तमानं वा पाचयन् सङ्ग्रहं नयेत् १०३
आमसङ्ग्रहणे दोषा दोषोपक्रम ईरिताः
पाययेद्दोषहरणं मोहादामज्वरे तु यः १०४
प्रसुप्तं कृष्णसर्पं स कराग्रेण परामृशेत्
ज्वरक्षीणस्य न हितं वमनं न विरेचनम् १०५
कामं तु पयसा तस्य निरूहैर्वा हरेन्मलान्
क्षीरोचितस्य प्रक्षीणश्लेष्मणो दाहतृड्वतः १०६
क्षीरं पित्तानिलार्तस्य पथ्यमप्यतिसारिणः
तद्वपुर्लङ्घनोत्तप्तं प्लुष्टं वनमिवाग्निना १०७
दिव्याम्बु जीवयेत्तस्य ज्वरं चाशु नियच्छति
संस्कृतं शीतमुष्णं वा तस्माद्धारोष्णमेव वा १०८
विभज्य काले युञ्जीत ज्वरिणं हन्त्यतोऽन्यथा
पयः सशुण्ठीखर्जूरमृद्वीकाशर्कराघृतम् १०९
शृतशीतं मधुयुतं तृड्दाहज्वरनाशनम्
तद्वद् द्राक्षाबलायष्टीसारिवाकणचन्दनैः ११०
चतुर्गुणेनाम्भसा वा पिप्पल्या वा शृतं पिबेत्
कासाच्छ्वासाच्छिरःशूलात्पार्श्वशूलाच्चिरज्वरात् १११
मुच्यते ज्वरितः पीत्वा पञ्चमूलीशृतं पयः
शृतमेरण्डमूलेन बालबिल्वेन वा ज्वरात् ११२
धारोष्णं वा पयः पीत्वा विबद्धानिलवर्चसः
सरक्तपिच्छातिसृतेः सतृट्शूलप्रवाहिकात् ११३
सिद्धं शुण्ठीबलाव्याघ्रीगोकण्टकगुडैः पयः
शोफमूत्रशकृद्वातविबन्धज्वरकासजित् ११४
वृश्चीवबिल्ववर्षाभूसाधितं ज्वरशोफनुत्
शिंशिपासारसिद्धं च क्षीरमाशु ज्वरापहम् ११५
निरूहस्तु बलं वह्निं विज्वरत्वं मुदं रुचिम्
दोषे युक्तः करोत्याशु पक्वे पक्वाशयं गते ११६
पित्तं वा कफपित्तं वा पक्वाशयगतं हरेत्
स्रंसनं त्रीनपि मलान् बस्तिः पक्वाशयाश्रयान् ११७
प्रक्षीणकफपित्तस्य त्रिकपृष्ठकटिग्रहे

दीप्ताग्नेर्बद्धशकृतः प्रयुञ्जीतानुवासनम् ११८
पटोलनिम्बच्छदनकटुका चतुरङ्गुलैः
स्थिराबलागोक्षुरक मदनोशीरवालकैः ११९
पयस्यर्धोदके क्वाथं क्षीरशेषं विमिश्रितम्
कल्कितैर्मुस्तमदनकृष्णामधुकवत्सकैः १२०
बस्तिं मधुघृताभ्यां च पीडयेज्ज्वरनाशनम्
चतस्रः पर्णिनीर्यष्टीफलोशीरनृपद्रुमान् १२१
क्वाथयेत्कल्कयेद्यष्टीशताह्वाफलिनीफलम्
मुस्तं च बस्तिः सगुडक्षौद्रसर्पिर्ज्वरापहः १२२
जीवन्तीं मदनं मेदां पिप्पलद्यं मधुकं वचाम्
ऋद्धिं रास्नां बलां बिल्वं शतपुष्पां शतावरीम् १२३
पिष्ट्वा क्षीरं जलं सर्पिस्तैलं चैकत्र साधितम्
ज्वरेऽनुवासनं दद्याद्यथास्नेहं यथामलम् १२४
ये च सिद्धिषु वक्ष्यन्ते बस्तयो ज्वरनाशनाः
शिरोरुग्गौरवश्लेष्महरमिन्द्रिय बोधनम् १२५
जीर्णज्वरे रुचिकरं दद्यान्नस्यं विरेचनम्
स्नैहिकं शून्यशिरसो दाहार्ते पित्तनाशनम् १२६
धूमगण्डूषकवलान् यथादोषं च कल्पयेत्
प्रतिश्यायास्यवैरस्यशिरः कण्ठामयापहान् १२७
अरुचौ मातुलुङ्गस्य केसरं साज्यसैन्धवम्
धात्रीद्राक्षासितानां वा कल्कमास्येन धारयेत् १२८
यथोपशयसंस्पर्शान् शीतोष्णद्रव्यकल्पितान्
अभ्यङ्गालेपसेकादीन् ज्वरे जीर्णे त्वगाश्रिते १२९
कुर्यादञ्जनधूमांश्च तथैवागन्तुजेऽपि तान्
दाहे सहस्रधौतेन सर्पिषाऽभ्यङ्गमाचरेत् १३०
सूत्रोक्तैश्च गणैस्तैस्तैर्मधुराम्लकषायकैः
दूर्वादिभिर्वा पित्तघ्नैः शोधनादिगणोदितैः १३१
शीतवीर्यैर्हिमस्पर्शैः क्वाथकल्कीकृतैः पचेत्
तैलं सक्षीरमभ्यङ्गात्सद्यो दाहज्वरापहम् १३२
शिरो गात्रं च तैरेव नातिपिष्टैः प्रलेपयेत्

तत्क्वाथेन परीषेकमवगाहं च योजयेत् १३३
तथाऽरनालसलिलक्षीरशुक्तघृतादिभिः
कपित्थमातुलुङ्गाम्लविदारीरोध्रदाडिमैः १३४
बदरीपल्लवोत्थेन फेनेनारिष्टकस्य वा
लिप्तेऽङ्गे दाहरुङ्मोहाश्च्छर्दिस्तृष्णा च शाम्यति १३५
यो वर्णितः पित्तहरो दोषोपक्रमणे क्रमः
तं च शीलयतः शीघ्रं सदाहो नश्यति ज्वरः १३६
वीर्योष्णैरुष्णसंस्पर्शैस्तगरा गुरुकुङ्कुमैः
कुष्ठस्थौणेयशैलेय सरलामरदारुभिः १३७
नखरास्नापुरवचा चण्डैलाद्वयचोरकैः
पृथ्वीकाशिग्रुसुर साहिंस्राध्यामकसर्षपैः १३८
दशमूलामृतैरण्डद्वय पत्तूररोहिषैः
तमालपत्रभूतीकशल्लकीधान्य दीप्यकैः १३९
मिशिमाषकुलत्थाग्नि प्रकीर्यानाकुलीद्वयैः
अन्यैश्च तद्विधैर्द्रव्यैः शीते तैलं ज्वरे पचेत् १४०
क्वथितैः कल्कितैर्युक्तैः सुरासौवीरकादिभिः
तेनाभ्यञ्ज्यात्सुखोष्णेन तैः सुपिष्टैश्च लेपयेत् १४१
कवोष्णैस्तैः परीषेकमवगाहं च कल्पयेत्
केवलैरपि तद्वच्च सुक्तगोमूत्रमस्तुभिः १४२
आरग्वधादिवर्गं च पानाभ्यञ्जनलेपने
धूपानगरुजान् यांश्च वक्ष्यन्ते विषमज्वरे १४३
अग्न्यनग्निकृतान् स्वेदान् स्वेदि भेषजभोजनम्
गर्भभूवेश्मशयनं कुथकम्बलरल्लकान् १४४
निर्धूमदीप्तैरङ्गारैर्हसन्तीश्च हसन्तिकाः
मद्यं सत्र्यूषणं तक्रं कुलत्थव्रीहिकोद्रवान् १४५
संशीलयेद्वेपथुमान् यच्चान्यदपि पित्तलम्
दयिताः स्तनशालिन्यः पीना विभ्रमभूषणाः १४६
यौवनासवमत्ताश्च तमालिङ्गेयुरङ्गनाः
वीतशीतं च विज्ञाय तास्ततोऽपनयेत्पुनः १४७
वर्धनेनैकदोषस्य क्षपणेनोच्छ्रितस्य वा

कफस्थानानुपूर्व्या वा तुल्यकक्षाञ्जयेन्मलान् १४८
सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः
शोफः सञ्जायते येन कश्चिदेव विमुच्यते १४९
रक्तावसेचनैः शीघ्रं सर्पिःपानैश्च तं जयेत्
प्रदेहैः कफपित्तघ्नैर्नावनैः कवलग्रहैः १५०
शीतोष्णस्निग्धरूक्षाद्यैर्ज्वरो यस्य न शाम्यति
शाखानुसारी तस्याशु मुञ्चेद्बाह्वोः क्रमाच्छिराम् १५१
अयमेव विधिः कार्यो विषमेऽपि यथायथम्
ज्वरे विभज्य वातादीन् यश्चानन्तरमुच्यते १५२
पटोलकटुकामुस्ता प्राणदामधुकैः कृताः
त्रिचतुःपञ्चशः क्वाथा विषमज्वरनाशनाः १५३
योजयेत्त्रिफलां पथ्यां गुडूचीं पिप्पलीं पृथक्
तैस्तैर्विधानैः सगुडं भल्लातकमथापि वा १५४
लङ्घनं बृंहणं वाऽदौ ज्वरागमनवासरे
प्रातः सतैलं लशुनं प्राग्भक्तं वा तथा घृतम् १५५
जीर्णं तद्वद्दधि पयस्तक्रं सर्पिश्च षट्पलम्
कल्याणकं पञ्चगव्यं तिक्ताख्यं वृषसाधितम् १५६
त्रिफलाकोलतर्कारीक्वाथे दध्ना शृतं घृतम्
तिल्वकत्वक्कृतावापं विषमज्वरजित्परम् १५७
सुरां तीक्ष्णं च यन्मद्यं शिखितित्तिरिदक्षजम्
मांसं मेद्योष्णवीर्यं च सहान्नेन प्रकामतः १५८
सेवित्वा तदहः स्वप्यादथवा पुनरुल्लिखेत्
सर्पिषो महतीं मात्रां पीत्वा वा छर्दयेत्पुनः १५९
नीलिनीमजगन्धां च त्रिवृतां कटुरोहिणीम्
पिबेज्ज्वरस्यागमने स्नेहस्वेदोपपादितः १६०
मनोह्वा सैन्धवं कृष्णा तैलेन नयनाञ्जनम्
योज्यं हिङ्गुसमा व्याघ्रीवसा नस्यं ससैन्धवम् १६१
पुराणसर्पिः सिंहस्य वसा तद्वत्ससैन्धवा
पलङ्कषा निम्बपत्रं वचा कुष्ठं हरीतकी १६२
सर्षपाः सयवाः सर्पिर्धूपो विड्वा बिडालजा

पुरध्यामवचासर्जनिम्बार्कागरुदारुभिः १६३
धूपो ज्वरेषु सर्वेषु कार्योऽयमपराजितः
धूपनस्याञ्जनोत्त्रासा ये चोक्ताश्चित्तवैकृते १६४
दैवाश्रयं च भैषज्यं ज्वरान् सर्वान् व्यपोहति
विशेषाद्विषमान् प्रायस्ते ह्यागन्त्वनुबन्धजाः १६५
यथास्वं च सिरां विध्येदशान्तौ विषमज्वरे
केवलानिलवीसर्पविस्फोटाभिहतज्वरे १६६
सर्पिःपान हिमालेपसेकमांसरसाशनम्
कुर्याद्यथास्वमुक्तं च रक्तमोक्षादि साधनम् १६७
ग्रहोत्थे भूतविद्योक्तं बलिमन्त्रादि साधनम्
ओषधीगन्धजे पित्तशमनं विषजिद्विषे १६८
इष्टैरर्थैर्मनोज्ञैश्च यथादोषशमेन च
हिताहितविवेकैश्च ज्वरं क्रोधादिजं जयेत् १६९
क्रोधजो याति कामेन शान्तिं क्रोधेन कामजः
भयशोकोद्भवौ ताभ्यां भीशोकाभ्यां तथेतरौ १७०
शापाथर्वणमन्त्रोत्थे विधिर्दैवव्यपाश्रयः
ते ज्वराः केवलाः पूर्वं व्याप्यन्तेऽनन्तरं मलैः १७१
तस्माद्दोषानुसारेण तेष्वाहारादि कल्पयेत्
न हि ज्वरोऽनुबध्नाति मारुताद्यैर्विना कृतः १७२
ज्वरकालस्मृतिं चास्य हारिभिर्विषयैर्हरेत्
करुणार्द्रं मनः शुद्धं सर्वज्वरविनाशनम् १७३
त्यजेदाबललाभाच्च व्यायामस्नानमैथुनम्
गुर्वसात्म्यविदाह्यन्नं यच्चान्यज्ज्वरकारणम् १७४
न विज्वरोऽपि सहसा सर्वान्नीनो भवेत्तथा
निवृत्तोऽपि ज्वरः शीघ्रं व्यापादयति दुर्बलम् १७५
सद्यः प्राणहरो यस्मात्तस्मात्तस्य विशेषतः
तस्यां तस्यामवस्थायां तत्तत्कुर्याद्भिषग्जितम् १७६
ओषधयो मणयश्च सुमन्त्राः साधुगुरुद्विजदैवतपूजाः
प्रीतिकरा मनसो विषयाश्च घ्नन्त्यपि विष्णुकृतं ज्वरमुग्रम् १७७
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां

चतुर्थे
चिकित्सितस्थानेज्वरचिकित्सितं नाम प्रथमोऽध्यायः १

द्वितीयोऽध्यायः

अथातो रक्तपित्तचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
ऊर्ध्वगं बलिनोऽवेगमेकदोषानुगं नवम्
रक्तपित्तं सुखे काले साधयेन्निरुपद्रवम् १
अधोगं यापयेद्रक्तं यच्च दोषद्वयानुगम्
शान्तं शान्तं पुनः कुप्यन्मार्गान्मार्गान्तरं च यत् २
अतिप्रवृत्तं मन्दाग्नेस्त्रिदोषं द्विपथं त्यजेत्
ज्ञात्वा निदानमयनं मलावनुबलौ बलम् ३
देशकालाद्यवस्थां च रक्तपित्ते प्रयोजयेत्
लङ्घनं बृंहणं वाऽदौ शोधनं शमनं तथा ४
सन्तर्पणोत्थं बलिनो बहुदोषस्य साधयेत्
ऊर्ध्वभागं विरेकेण वमनेन त्वधोगतम् ५
शमनैर्बृंहणैश्चान्यल्लङ्घ्यबृंह्यानवेद्द्य च
ऊर्ध्वं प्रवृत्ते शमनौ रसौ तिक्तकषायकौ ६
उपवासश्च निःशुण्ठीषडङ्गोदकपायिनः
अधोगे रक्तपित्ते तु बृंहणो मधुरो रसः ७
ऊर्ध्वगे तर्पणं योज्यं प्राक् च पेया त्वधोगते
अश्नतो बलिनोऽशुद्धं न धार्यं तद्धि रोगकृत् ८
धारयेदन्यथा शीघ्रमग्निवच्छीघ्रकारि तत्
त्रिवृच्छ्यामाकषायेण कल्केन च सशर्करम् ९
साधयेद्विधिवल्लेहं लिह्यात्पाणितलं ततः
त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु १०
मोदकः सन्निपातोर्ध्वरक्तशोफज्वरापहः
त्रिवृत्समसिता तद्वत् पिप्पलीपादसंयुता ११
वमनं फलसंयुक्तं तर्पणं ससितामधु
ससितं वा जलं क्षौद्रयुक्तं वा मधुकोदकम् १२

क्षीरं वा रसमिक्षोर्वा शुद्धस्यानन्तरो विधिः
यथास्वं मन्थपेयादिः प्रयोज्यो रक्षता बलम् १३
मन्थो ज्वरोक्तो द्राक्षादिः पित्तघ्नैर्वा फलैः कृतः
मधुखर्जूरमृद्वीकापरूष कसिताम्भसा १४
मन्थो वा पञ्चसारेण सघृतैर्लाजसक्तुभिः
दाडिमामलकाम्लो वा मन्दाग्न्यम्लाभिलाषिणाम् १५
कमलोत्पलकिञ्जल्कपृश्निपर्णी प्रियङ्गुकाः
उशीरं शाबरं रोध्रं शृङ्गबेरं कुचन्दनम् १६
ह्रीबेरं धातकीपुष्पं बिल्वमध्यं दुरालभा
अर्धार्धैर्विहिताः पेया वक्ष्यन्ते पादयौगिकाः १७
भूनिम्बसेव्यजलदा मसूराः पृश्निपर्ण्यपि
विदारिगन्धा मुद्गाश्च बला सर्पिर्ह रेणुकाः १८
जाङ्गलानि च मांसानि शीतवीर्याणि साधयेत्
पृथक्पृथग्जले तेषां यवागूः कल्पयेद्रसे १९
शीताः सशर्कराक्षौद्रास्तद्वन्मांसरसानपि
ईषदम्लाननम्लान् वा घृतभृष्टान् सशर्करान् २०
शूकशिम्बीभवं धान्यं रक्ते शाकं च शस्यते
अन्नस्वरूपविज्ञाने यदुक्तं लघु शीतलम् २१
पूर्वोक्तमम्बु पानीयं पञ्चमूलेन वा शृतम्
लघुना शृतशीतं वा मध्वम्भो वा फलाम्बु वा २२
शशः सवास्तुकः शस्तो विबन्धे तित्तिरिः पुनः
उदुम्बरस्य निर्यूहे साधितो मारुतेऽधिके २३
प्लक्षस्य बर्हिणस्तद्वन्न्यग्रोधस्य च कुक्कुटः
यत्किञ्चिद्रक्तपित्तस्य निदानं तच्च वर्जयेत् २४
वासारसेन फलिनीमृद्रोध्राञ्जनमाक्षिकम्
पित्तासृक् शमयेत्पीतं निर्यासो वाऽटरूषकात् २५
शर्करामधुसंयुक्तः केवलो वा शृतोऽपि वा
वृषः सद्यो जयत्यस्रं स ह्यस्य परमौषधम् २६
पटोलमालतीनिम्ब चन्दनद्वयपद्मकम्
रोध्रो वृषस्तन्दुलीयः कृष्णा मृन्मदयन्तिका २७

शतावरी गोपकन्या काकोल्यौ मधुयष्टिका
रक्तपित्तहराः क्वाथास्त्रयः समधुशर्कराः २८
पलाशवल्कक्वाथो वा सुशीतः शर्करान्वितः
लिह्याद्वा मधुसर्पिर्भ्यां गवाश्वशकृतो रसम् २९
सक्षौद्रं ग्रथिते रक्ते लिह्यात्पारावताच्छकृत्
अतिनिःस्रुतरक्तश्च क्षौद्रेण रुधिरं पिबेत् ३०
जाङ्गलं भक्षयेद्वाऽजमामं पित्तयुतं यकृत्
चन्दनोशीरजलदलाजमुद्गकणायवैः ३१
बलाजले पर्युषितैः कषायो रक्तपित्तहा
प्रसादश्चन्दनाम्भोजसेव्यमृद्भृष्टलोष्टजः ३२
सुशीतः ससिताक्षौद्रः शोणितातिप्रवृत्तिजित्
आपोथ्य वा नवे कुम्भे प्लावयेदिक्षुगण्डिकाः ३३
स्थितं तद्गुप्तमाकाशे रात्रिं प्रातः स्रुतं जलम्
मधुमद्विकचाम्भोजकृतोत्तंसं च तद्गुणम् ३४
ये च पित्तज्वरे चोक्ताः कषायास्तांश्च योजयेत्
कषायैर्विविधैरेभिर्दीप्तेऽग्नौ विजिते कफे ३५
रक्तपित्तं न चेच्छाम्येत्तत्र वातोल्बणे पयः
युञ्ज्याच्छागं शृतं तद्वद्गव्यं पञ्चगुणेऽम्भसि ३६
पञ्चमूलेन लघुना शृतं वा ससितामधु
जीवकर्षभकद्राक्षा बलागोक्षुरनागरैः ३७
पृथक्पृथक्शृतं क्षीरं सघृतं सितयाऽथवा
गोकण्टकाभीरुशृतं पर्णिनीभिस्तथा पयः ३८
हन्त्याशु रक्तं सरुजं विशेषान्मूत्रमार्गगम्
विण्मार्गगे विशेषेण हितं मोचरसेन तु ३९
वटप्ररोहैः शुङ्गैर्वा शुण्ठ्युदीच्योत्पलैरपि
रक्तातिसारदुर्नामचिकित्सां चात्र कल्पयेत् ४०
पीत्वा कषायान् पयसा भुञ्जीत पयसैव च
कषाययोगैरेभिर्वा विपक्वं पाययेद्घृतम् ४१
समूलमस्तकं क्षुण्णं वृषमष्टगुणेऽम्भसि
पक्त्वाऽष्टांशावशेषेण घृतं तेन विपाचयेत् ४२

तत्पुष्पगर्भं तच्छीतं सक्षौद्रं पित्तशोणितम्
पित्तगुल्मज्वरश्वासकास हृद्रोगकामलाः ४३
तिमिरभ्रमवीसर्प स्वरसादांश्च नाशयेत्
पलाशवृन्तस्वरसे तद्गर्भं च घृतं पचेत् ४४
सक्षौद्रं तच्च रक्तघ्नं तथैव त्रायमाणया
रक्ते सपिच्छे सकफे ग्रथिते कण्ठमार्गगे ४५
लिह्यान्माक्षिकसर्पिर्भ्यां क्षारमुत्पलनालजम्
पृथक्पृथक् तथाऽम्भोजरेणुश्यामामधूकजम् ४६
गुदागमे विशेषेण शोणिते बस्तिरिष्यते
घ्राणगे रुधिरे शुद्धे नावनं चानुषेचयेत् ४७
कषाययोगान् पूर्वोक्तान् क्षीरेक्ष्वादिरसाप्लुतान्
क्षीरादीन्ससितांस्तोयं केवलं वा जलं हितम् ४८
रसो दाडिमपुष्पाणामाम्रास्थ्नः शाड्वलस्य वा
कल्पयेच्छीतवर्गं च प्रदेहाभ्यञ्जनादिषु ४९
यच्च पित्तज्वरे प्रोक्तं बहिरन्तश्च भेषजम्
रक्तपित्ते हितं तच्च क्षतक्षीणे हितं च यत् ५०

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे
चिकित्सितस्थाने रक्तपित्तचिकित्सितं नाम द्वितीयोऽध्यायः २

तृतीयोऽध्यायः

अथातः कासचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
केवलानिलजं कासं स्नेहैरादावुपाचरेत्
वातघ्नसिद्धैः स्निग्धैश्च पेयायूषरसादिभिः १
लेहैर्धूमैस्तथाऽभ्यङ्गस्वेद सेकावगाहनैः
बस्तिभिर्बद्धविड्वातं सपित्तं तूर्ध्वभक्तिकैः २
घृतैः क्षीरैश्च सकफं जयेत्स्नेहविरेचनैः
गुडूचीकण्टकारीभ्यां पृथक्त्रिंशत्पलाद्रसे ३
प्रस्थः सिद्धो घृताद्वातकासनुद्वह्निदीपनः

क्षाररास्नावचाहिङ्गुपाठायष्ट्याह्वधान्यकैः ४
द्विशाणैः सर्पिषः प्रस्थं पञ्चकोलयुतैः पचेत्
दशमूलस्य निर्यूहे पीतो मण्डानुपायिना ५
स कासश्वासहृत्पार्श्वग्रहणीरोगगुल्मनुत्
द्रोणेऽपा साधयेद्रास्नादशमूलशतावरीः ६
पलोन्मिता द्विकुडवं कुलत्थं बदरं यवम्
तुलार्धं चाजमांसस्य तेन साध्यं घृताढकम् ७
समक्षीरं पलांशैश्च जीवनीयैः समीक्ष्य तत्
प्रयुक्तं वातरोगेषु पाननावनबस्तिभिः ८
पञ्चकासान् शिरःकम्पं योनिवङ्क्षणवेदनाम्
सर्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्ध्वानिलान् जयेत् ९
विदार्यादिगणक्वाथकल्कसिद्धं च कासजित्
अशोकबीजक्षवक जन्तुघ्नाञ्जनपद्मकैः १०
सविडैश्च घृतं सिद्धं तच्चूर्णं वा घृतप्लुतम्
लिह्यात्पयश्चानु पिबेदाजं कासातिपीडितः ११
विडङ्गं नागरं रास्ना पिप्पली हिङ्गु सैन्धवम्
भार्गी क्षारश्च तच्चूर्णं पिबेद्वा घृतमात्रया १२
सकफेऽनिलजे कासे श्वासहिध्माहताग्निषु
दुरालभां शृङ्गबेरं शठीं द्राक्षां सितोपलाम् १३
लिह्यात्कर्कटशृङ्गीं च कासे तैलेन वातजे
दुस्पर्शां पिप्पलद्यं मुस्तां भार्गीं कर्कटकीं शठीम् १४
पुराणगुडतैलाभ्यां चूर्णितान्यवलेहयेत्
तद्वत्सकृष्णां शुण्ठीं च सभार्गी तद्वदेव च १५
पिबेच्च कृष्णां कोष्णेन सलिलेन ससैन्धवान्
मस्तुना ससितां शुण्ठीं दध्ना वा कणरेणुकाम् १६
पिबेद्वदरमज्ज्ञो वा मदिरादधिमस्तुभिः
अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम् १७
कासी सपीनसो धूमं स्नैहिकं विधिना पिबेत्
हिध्माश्वासोक्तधूमांश्च क्षीरमांसरसाशनः १८
ग्राम्यानूपौदकैः शालियवगोधूमषष्टिकान्

रसैर्माषात्मगुप्तानां यूषैर्वा भोजयेद्धितान् १९
यवानीपिप्पली बिल्वमध्यनागरचित्रकैः
रास्नाजाजीपृथक्पर्णीपलाश शठिपौष्करैः २०
सिद्धां स्निग्धाम्ललवणां पेयामनिलजे पिबेत्
कटिहृत्पार्श्वकोष्ठार्तिश्वासहिध्माप्रणाशनीम् २१
दशमूलरसे तद्वत् पञ्चकोलगुडान्विताम्
पिबेत्पेयां समतिलां क्षैरेयीं वा ससैन्धवाम् २२
मात्स्यकौक्कुटवाराहैर्मांसैर्वा साज्यसैन्धवाम्
वास्तुको वायसीशाकं कासघ्नः सुनिषण्णकः २३
कण्टकार्याः फलं पत्रं बालं शुष्कं च मूलकम्
स्नेहास्तैलादयो भक्ष्याः क्षीरेक्षुरसगौडिकाः २४
दधिमस्त्वारनालाम्लफलाम्बुमदिराः पिबेत्
पित्तकासे तु सकफे वमनं सर्पिषा हितम् २५
तथा मदनकाश्मर्यमधुकक्वथितैर्जलैः
फलयष्ट्याह्वकल्कैर्वा विदारीक्षुरसाप्लुतैः २६
पित्तकासे तनुकफे त्रिवृतां मधुरैर्युताम्
युञ्ज्याद्विरेकाय युतां घनश्लेष्मणि तिक्तकैः २७
हृतदोषो हिमं स्वादु स्निग्धं संसर्जनं भजेत्
घने कफे तु शिशिरं रूक्षं तिक्तोपसंहितम् २८
लेहः पैत्ते सिताधात्रीक्षौद्रद्राक्षाहिमोत्पलैः
सकफे साब्दमरिचः सघृतः सानिले हितः २९
मृद्वीकार्धशतं त्रिंशत्पिप्पल्यः शर्करापलम्
लेहयेन्मधुना गोर्वा क्षीरपस्य शकृद्रसम् ३०
त्वगेलाव्योषमृद्वीका पिप्पलीमूलपौष्करैः
लाजमुस्ताशठीरास्ना धात्रीफलबिभीतकैः ३१
शर्कराक्षौद्रसर्पिर्भिर्लेहो हृद्रोगकासहा
मधुरैर्जाङ्गलरसै र्यवश्यामाककोद्रवाः ३२
मुद्गादियूषैः शाकैश्च तिक्तकैर्मात्रया हिताः
घनश्लेष्मणि लेहाश्च तिक्तका मधुसंयुताः ३३
शालयः स्युस्तनुकफे षष्टिकाश्च रसादिभिः

शर्कराम्भोऽनुपानार्थं द्राक्षेक्षुस्वरसाः पयः ३४
काकोलीबृहतीमेदाद्वयैः सवृषनागरैः
पित्तकासे रसक्षीरपेयायूषान् प्रकल्पयेत् ३५
द्राक्षां कणां पञ्चमूलं तृणाख्यं च पचेज्जले
तेन क्षीरं शृतं शीतं पिबेत्समधुशर्करम् ३६
साधितां तेन पेयां वा सुशीतां मधुनाऽन्विताम्
शठीह्रीबेरबृहतीशर्कराविश्वभेषजम् ३७
पिष्ट्वा रसं पिबेत्पूतं वस्त्रेण घृतमूर्च्छितम्
मेदां विदारीं काकोलद्यं स्वयंगुप्ताफलं बलाम् ३८
शर्करां जीवकं मुद्गमाषपर्ण्यौ दुरालभाम्
कल्कीकृत्य पचेत्सर्पिः क्षीरेणाष्टगुणेन तत् ३९
पानभोजनलेहेषु प्रयुक्तं पित्तकासजित्
लिह्याद्वा चूर्णमेतेषां कषायमथवा पिबेत् ४०
कफकासी पिबेदादौ सुरकाष्ठात् प्रदीपितात्
स्नेहं परिस्रुतं व्योषयवक्षारावचूर्णितम् ४१
स्निग्धं विरेचयेदूर्ध्वमधो मूर्ध्नि च युक्तितः
तीक्ष्णैर्विरेकैर्बलिनं संसर्गी चास्य योजयेत् ४२
यवमुद्गकुलत्थान्नैरुष्णरूक्षैः कटूत्कटैः
कासमर्दकवार्ताकव्याघ्रीक्षारकणान्वितैः ४३
धान्वबैलरसैः स्नेहैस्तिलसर्षपनिम्बजैः
दशमूलाम्बु घर्माम्बु मद्यं मध्वम्बु वा पिबेत् ४४
मूलैः पौष्करशम्याकपटोलैः संस्थितं निशाम्
पिबेद्वारि सहक्षौद्रं कालेष्वन्नस्य वा त्रिषु ४५
पिप्पली पिप्पलीमूलं शृङ्गबेरं बिभीतकम्
शिखिकुक्कुटपिच्छानां मषी क्षारो यवोद्भवः ४६
विशाला पिप्पलीमूलं त्रिवृता च मधुद्रवाः
कफकासहरा लेहास्त्रयः श्लोकार्धयोजिताः ४७
मधुना मरिचं लिह्यान्मधुनैव च जोङ्गकम्
पृथग्रसांश्च मधुना व्याघ्रीवार्ताकभृङ्गजान् ४८
कासघ्नस्याश्वशकृतः सुरसस्यासितस्य च

देवदारुशठीरास्नाकर्कटाख्यादुरालभाः ४६
पिप्पली नागरं मुस्तं पथ्या धात्री सितोपला
लाजाः सितोपला सर्पिः शृङ्गी धात्रीफलोद्भवा ५०
मधुतैलयुता लेहास्त्रयो वातानुगे कफे
द्वे पले दाडिमादष्टौ गुडाद्व्योषात्पलत्रयम् ५१
रोचनं दीपनं स्वर्यं पीनसश्वासकासजित्
गुडक्षारोषणकणादाडिमं श्वासकासजित् ५२
क्रमात्पलद्वयार्धाक्ष कर्षार्धाक्षपलोन्मितम्
पिबेज्ज्वरोक्तं पथ्यादि सशृङ्गीकं च पाचनम् ५३
अथवा दीप्यकत्रिवृद्विशालाघनपौष्करम्
सकणं क्वथितं मूत्रे कफकासी जलेऽपि वा ५४
तैलभृष्टं च वैदेहीकल्काक्षं ससितोपलम्
पाययेत्कफकासघ्नं कुलत्थसलिलाप्लुतम् ५५
दशमूलाढके प्रस्थं घृतस्याक्षसमैः पचेत्
पुष्कराह्वशठीबिल्वसुरसाव्योषहिङ्गुभिः ५६
पेयानुपानं तत्सर्ववातश्लेष्मामयापहम्
निर्गुण्डीपत्रनिर्यासससाधितं कासजिद्घृतम् ५७
घृतं रसे विडङ्गानां व्योषगर्भं च साधितम् ५७-२
पुनर्नवशिवाटिका सरलकासमर्दामृता
पटोलबृहतीफणिज्जकरसैः पयःसंयुतैः
घृतं त्रिकटुना च सिद्धमुपयुज्य सञ्जायते
नकासविषमज्वरक्षय गुदाङ्कुरेभ्यो भयम् ५८
समूलफलपत्रायाः कण्टकार्या रसाढके ५९
घृतप्रस्थं वलाव्योषविडङ्गशठिदाडिमैः
सौवर्चलयवक्षार मूलामलकपौष्करैः ६०
वृश्चीवबृहतीपथ्यायवानी चित्रकर्धिभिः
मृद्वीकाचव्यवर्षाभूदुरालम्भाम्लवेतसैः ६१
शृङ्गीतामलकीभार्गीरास्नागोक्षुरकैः पचेत्
कल्कैस्तत्सर्वकासेषु श्वासहिध्मासु चेष्यते ६२
कण्टकारीघृतं चैतत्कफव्याधिविनाशनम्

पचेद्व्याघ्रीतुलां क्षुरणां वहेऽपामाढकस्थिते ६३
क्षिपेत् पूते तु सञ्चूर्य व्योषरास्नामृताग्निकान्
शृङ्गीभार्गीघनग्रन्थिधन्वयासान् पलार्धकान् ६४
सर्पिषः षोडशपलं चत्वारिंशत्पलानि च
मत्स्यण्डिकायाः शुद्धायाः पुनश्च तदधिश्रयेत् ६५
दर्वीलेपिनि शीते च पृथक् द्विकुडवं क्षिपेत्
पिप्पलीनां तवक्षीर्या माक्षिकस्यानवस्य च ६६
लेहोऽय गुल्महृद्रोगदुर्नामश्वासकासजित्
शमनं च पिबेद्धूमं शोधनं बहले कफे ६७
मनःशिलालमधुक मांसीमुस्तेङ्गुदीत्वचः
धूमं कासघ्नविधिना पीत्वा क्षीरं पिबेदनु ६८
निष्ठ्यूतान्ते गुडयुतं कोष्णं धूमो निहन्ति सः
वातश्लेष्मोत्तरान् कासानचिरेण चिरन्तनान् ६९
तमकः कफकासे तु स्याच्चेत्पित्तानुबन्धजः
पित्तकासक्रियां तत्र यथावस्थं प्रयोजयेत् ७०
कफानुबन्धे पवने कुर्यात्कफहरां क्रियाम्
पित्तानुबन्धयोर्वातकफयोः पित्तनाशिनीम् ७१
वातश्लेष्मात्मके शुष्के स्निग्धमार्द्रे विरूक्षणम्
कासे कर्म सपित्ते तु कफजे तिक्तसंयुतम् ७२
उरस्यन्तःक्षते सद्यो लाक्षां क्षौद्रयुतां पिबेत्
क्षीरेण शालीन् जीर्णेऽद्यात्क्षीरेणैव सशर्करान् ७३
पार्श्वबस्तिसरुक्चाल्पपित्ताग्निस्तां सुरायुताम्
भिन्नविट्कः समुस्तातिविषापाठां सवत्सकाम् ७४
लाक्षां सर्पिर्मधूच्छिष्टं जीवनीयं गणं सिताम्
त्वक्क्षीरीं समितं क्षीरे पक्त्वा दीप्तानलः पिबेत् ७५
इक्ष्वारिकाबिस ग्रन्थिपद्मकेसरचन्दनैः
शृतं पयो मधुयुतं सन्धानार्थं पिबेत्क्षती ७६
यवानां चूर्णमामानां क्षीरे सिद्धं घृतान्वितम्
ज्वरदाहे सिताक्षौद्रसक्तून्वा पयसा पिबेत् ७७
कासवांस्तु पिबेत्सर्पिर्मधुरौषधसाधितम्

गुडोदकं वा क्वथितं सक्षौद्रमरिचं हितम् ७८
चूर्णमामलकानां वा क्षीरे पक्वं घृतान्वितम्
रसायनविधानेन पिप्पलीर्वा प्रयोजयेत् ७९
कासी पर्वास्थिशूली च लिह्यात्सघृतमाक्षिकाः
मधूकमधुकद्राक्षात्वक्क्षीरीपिप्पलीबलाः ८०
त्रिजातमर्धकर्षांशं पिप्पल्यर्धपलं सिता
द्राक्षा मधूकं खर्जूरं पलांशं श्लक्ष्णचूर्णितम् ८१
मधुना गुटिका घ्नन्ति ता वृष्याः पित्तशोणितम्
कासश्वासारुचिच्छर्दिमूर्च्छाहिध्मामदभ्रमान् ८२
क्षतक्षयस्वरभ्रंशप्लीह शोषाढ्यमारुतान्
रक्तनिष्ठीवहृत्पार्श्वरुक्पिपासाज्वरानपि ८३
वर्षाभूशर्करारक्तशालितण्डुलजं रजः
रक्तष्ठीवी पिबेत्सिद्धं द्राक्षारसपयोघृतैः ८४
मधूकमधुकक्षीरसिद्धं वा तण्डलीयकम्
याथास्वं मार्गविसृते रक्ते कुर्याच्च भेषजम् ८५
मूढवातस्त्वजामेदः सुराभृष्टं ससैन्धवम्
क्षामः क्षीणः क्षतोरस्को मन्दनिद्रोऽग्निदीप्तिमान् ८६
शृतक्षीरसरेणाद्यात्सघृत क्षौद्रशर्करम्
शर्करायवगोधूमं जीवकर्षभकौ मधु ८७
शृतक्षीरानुपानं वा लिह्यात्क्षीणः क्षतः कृशः
क्रव्यात्पिशितनिर्यूहं घृतभृष्टं पिबेच्च सः ८८
पिप्पलीक्षौद्रसंयुक्तं मांसशोणितवर्धनम्
न्यग्रोधोदुम्बराश्वत्थप्लक्षशालप्रियङ्गुभिः ८९
तालमस्तकजम्बूत्वक्प्रियालैश्च सपद्मकैः
साश्वकर्णैः शृतात्क्षीरादद्याज्जातेन सर्पिषा ९०
शाल्योदनं क्षतोरस्कः क्षीणशुक्रबलेन्द्रियः
वातपित्तार्दितेऽभ्यङ्गो गात्रभेदे घृतैर्मतः ९१
तैलैश्चानिलरोगघ्नैः पीडिते मातरिश्वना
हृत्पार्श्वार्तिषु पानं स्याज्जीवनीयस्य सर्पिषः ९२
कुर्याद्वा वातरोगघ्नं पित्तरक्ताविरोधि यत्

यष्ट्याह्वनागबलयोः क्वाथे क्षीरसमे घृतम् ९३
पयस्यापिप्पलीवांशीकल्कैः सिद्धं क्षते हितम्
जीवनीयो गणः शुण्ठी वरी वीरा पुनर्नवा ९४
बलाभार्गीस्वगुप्तर्द्धि शठीतामलकीकणाः
शृङ्गाटकं पयस्या च पञ्चमूलं च यल्लघु ९५
द्राक्षाक्षोडादि च फलं मधुरस्निग्धबृंहणम्
तैः पचेत्सर्पिषः प्रस्थं कर्षांशैः श्लक्ष्णकल्कितैः ९६
क्षीरधात्रीविदारीक्षु च्छागमांसरसान्वितम्
प्रस्थार्धं मधुनः शीते शर्करार्धतुलारजः ९७
पलार्धकं च मरिचत्वगेलापत्रकेसरम्
विनीय चूर्णितं तस्माल्लिह्यान्मात्रां यथाबलम् ९८
अमृतप्राशमित्येतन्नराणाममृतं घृतम्
सुधामृतरसं प्राश्यं क्षीरमांसरसाशिना ९९
नष्टशुक्रक्षतक्षीण दुर्बलव्याधिकर्शितान्
स्त्रीप्रसक्तान् कृशान् वर्णस्वरहीनांश्च बृंहयेत् १००
कासहिध्माज्वरश्वासदाह तृष्णास्रपित्तनुत्
पुत्रदं छर्दिमूर्च्छाहृद्योनिमूत्रामयापहम् १०१
श्वदंष्ट्रोशीरमञ्जिष्ठा बलाकाश्मर्यकत्तृणम्
दर्भमूलं पृथक्पर्णीं पलाशर्षभकौ स्थिराम् १०२
पालिकानि पचेत्तेषां रसे क्षीरचतुर्गुणे
कल्कैः स्वगुप्ताजीवन्तीमेदर्षभकजीवकैः १०३
शतावर्यर्द्धिमृद्वीका शर्कराश्रावणीबिसैः
प्रस्थः सिद्धो घृताद्वातपित्तहृद्रोगशूलनुत् १०४
मूत्रकृच्छ्रप्रमेहार्शः कासशोषक्षयापहः
धनुःस्त्रीमद्यभाराध्वखिन्नानां बलमांसदः १०५
मधुकाष्टपलद्राक्षाप्रस्थक्वाथे पचेद्घृतम्
पिप्पल्यष्टपले कल्के प्रस्थं सिद्धे च शीतले १०६
पृथगष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत्
समसक्तु क्षतक्षीणरक्तगुल्मेषु तद्धितम् १०७
धात्रीफलविदारीक्षुजीवनीय रसाद्घृतात्

गव्याजयोश्च पयसोः प्रस्थं प्रस्थं विपाचयेत् १०८
सिद्धशीते सिताक्षौद्रं द्विप्रस्थं विनयेत्ततः
यक्ष्मापस्मारपित्तासृक्कास मेहक्षयापहम् १०९
वयःस्थापनमायुष्यं मांसशुक्रबलप्रदम्
घृतं तु पित्तेऽभ्यधिके लिह्याद्वातेऽधिके पिबेत् ११०
लीढं निर्वापयेत्पित्तमल्पत्वाद्धन्ति नानलम्
आक्रामत्यनिलं पीतमूष्माणं निरुणद्धि च १११
क्षामक्षीणकृशाङ्गानामेतान्येव घृतानि तु
त्वक्क्षीरीशर्करालाजचूर्णैः स्त्यानानि योजयेत् ११२
सर्पिर्गुडान् समध्वंशान् कृत्वा दद्यात्पयोऽनु च
रेतो वीर्यं बलं पुष्टिं तैराशुतरमाप्नुयात् ११३
वीतत्वगस्थिकूष्माण्डतुलां स्विन्नां पुनः पचेत्
घट्टयन् सर्पिषः प्रस्थे क्षौद्रवर्णेऽत्र च क्षिपेत् ११४
खण्डाच्छतं कणाशुण्ठ्योर्द्विपलं जीरकादपि
त्रिजातधान्यमरिचं पृथगर्धपलांशकम् ११५
अवतारितशीते च दत्वा क्षौद्रं घृतार्धकम्
खजेनामथ्य च स्थाप्यं तन्निहन्त्युपयोजितम् ११६
कासहिध्माज्वरश्वासरक्त पित्तक्षतक्षयान्
उरःसन्धानजननं मेधास्मृतिबलप्रदम् ११७
अश्विभ्यां विहितं हृद्यं कूष्माण्डकरसायनम्
पिबेन्नागबलामूलस्यार्धकर्षाभिवर्धितम् ११८
पलं क्षीरयुतं मासं क्षीरवृत्तिरनन्नभुक्
एष प्रयोगः पुष्ट्यायुर्बलवर्णकरः परम् ११९
मण्डूकपर्ण्याः कल्पोऽय यष्ट्या विश्वौषधस्य च
पादशेषं जलद्रोणे पचेन्नागबलातुलाम् १२०
तेन क्वाथेन तुल्यांशं घृतं क्षीरं च साधयेत्
पलार्धिकैश्चातिबलाबलायष्टीपुनर्नवैः १२१
प्रपौण्डरीककाश्मर्य प्रियालकपिकच्छुभिः
अश्वगन्धासिताभीरुमेदा युग्मत्रिकण्टकैः १२२
काकोलीक्षीरकाकोली क्षीरशुक्लाद्विजीरकैः

मृणालबिसखर्जूर शृङ्गाटककसेरुकैः १२३
एतन्नागबलासर्पिः पित्तरक्तक्षतक्षयान्
जयेत्तृड्भ्रमदाहांश्च बलपुष्टिकरं परम् १२४
वर्ण्यमायुष्यमोजस्यं बलीपलितनाशनम्
उपयुज्य च षण्मासान् वृद्धोऽपि तरुणायते १२५
दीप्तेऽग्नौ विधिरेष स्यात् मन्दे दीपनपाचनः
यक्ष्मोक्तः क्षतिनां शस्तो ग्राही शकृति तु द्रवे १२६
दशमूलं स्वयंगुप्तां शङ्खपुष्पीं शठीं बलाम्
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् १२७
भार्गीं पुष्करमूलं च द्विपलांशं यवाढकम्
हरीतकीशतं चैकं जलपञ्चाढके पचेत् १२८
यवस्वेदे कषायं तं पूतं तच्चाभयाशतम्
पचेद्गुडतुलां दत्त्वा कुडवं च पृथग्घृतात् १२९
तैलात्सपिप्पलीचूर्णात्सिद्धशीते च माक्षिकात्
लेहं द्वे चाभये नित्यमतः खादेद्रसायनात् १३०
तद्वलीपलितं हन्याद्वर्णायुर्बलवर्धनम्
पञ्चकासान् क्षयं श्वासं सहिध्मं विषमज्वरम् १३१
मेहगुल्मग्रहण्यर्शो हृद्रोगारुचिपीनसान्
अगस्त्यविहितं धन्यमिदं श्रेष्ठं रसायनम् १३२
दशमूलं बलां मूर्वां हरिद्रे पिप्पलीद्वयम्
पाठाश्वगन्धापामार्गस्वगुप्तातिविषामृताः १३३
बालबिल्वं त्रिवृद्दन्तीमूलं पत्रं च चित्रकात्
पयस्यां कुटजं हिंस्रां पुष्पं सारं च बीजकात् १३४
बोटस्थविरभल्लातविकङ्कत शतावरीः
पूतीकरञ्जशम्याकचन्द्र लेखासहाचरम् १३५
सौभाञ्जनकनिम्बत्वगिक्षुरं च पलांशकम्
पथ्यासहस्रं सशतं यवानां चाढकद्वयम् १३६
पचेदष्टगुणे तोये यवस्वेदेऽवतारयेत्
पूते क्षिपेत्सपथ्ये च तत्र जीर्णगुडात्तुलाम् १३७
तैलाज्यधात्रीरसतः प्रस्थं प्रस्थं ततः पुनः

अधिश्रयेन्मृदावग्नौ दर्वीलेपेऽवतार्य च १३८
शीते प्रस्थद्वयं क्षौद्रात्पिप्पलीकुडवं क्षिपेत्
चूर्णीकृतं त्रिजाताच्च त्रिपलं निखनेत्ततः १३९
धान्ये पुराणकुम्भस्थं मासं खादेच्च पूर्ववत्
रसायनं वसिष्ठोक्तमेतत्पूर्वगुणाधिकम् १४०
स्वस्थानां निष्परीहारं सर्वर्तुषु च शस्यते
पालिकं सैन्धवं शुण्ठी द्वे च सौवर्चलात्पले १४१
कुडवांशानि वृक्षाम्लं दाडिमं पत्रमार्जकात्
एकैकां मरिचाजाज्योर्धान्यकाद् द्वे चतुर्थिके १४२
शर्करायाः पलान्यत्र दश द्वे च प्रदापयेत्
कृत्वा चूर्णमतो मात्रामन्नपानेषु दापयेत् १४३
रुच्यं तद्दीपनं बल्यं पार्श्वार्तिश्वासकासजित्
एकां षोडशिकां धान्याद् द्वे द्वे चाजाजिदीप्यकात् १४४
ताभ्यां दाडिमवृक्षाम्ले द्विर्द्विः सौर्वचलात्पलम्
शुण्ठ्याः कर्षं दधित्थस्य मध्यात्पञ्च पलानि च १४५
तच्चूर्णं षोडशपलैः शर्कराया विमिश्रयेत्
षाडवोऽय प्रदेयः स्यादन्नपानेषु पूर्ववत् १४६
विधिश्च यक्ष्मविहितो यथावस्थं क्षते हितः
निवृत्ते क्षतदोषे तु कफे वृद्धे उरः शिरः १४७
दाल्यते कासिनो यस्य स ना धूमान् पिबेदिमान्
द्विमेदाद्विबलायष्टीकल्कैः क्षौमे सुभाविते १४८
वर्तिं कृत्वा पिबेद्धूमं जीवनीयघृतानुपः
मनःशिलापलाशाजगन्धात्वक्क्षीरिनागरैः १४९
तद्वदेवानुपानं तु शर्करेक्षुगुडोदकम्
पिष्ट्वा मनःशिलां तुल्यामार्द्रया वटशुङ्गया १५०
ससर्पिष्कं पिबेद्धूमं तित्तिरिप्रतिभोजनम्
क्षयजे बृंहणं पूर्वं कुर्यादग्नेश्च वर्धनम् १५१
बहुदोषाय सस्नेहं मृदु दद्याद्विरेचनम्
शम्याकेन त्रिवृतया मृद्वीकारसयुक्तया १५२
तिल्वकस्य कषायेण विदारीस्वरसेन च

सर्पिः सिद्धं पिबेद्युक्त्या क्षीणदेहो विशोधनम् १५३
पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान्
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत् १५४
विदारिभिः कदम्बैर्वा तालसस्यैश्च साधितम्
घृतं पयश्च मूत्रस्य वैवर्ण्ये कृच्छ्रनिर्गमे १५५
शूने सवेदने मेढ्रे पायौ सश्रोणिवङ्क्षणे
घृतमण्डेन लघुनाऽनुवास्यो मिश्रकेण वा १५६
जाङ्गलैः प्रतिभुक्तस्य वर्तकाद्या बिलेशयाः
क्रमशः प्रसहास्तद्वत्प्रयोज्याः पिशिताशिनः १५७
औष्ण्यात्प्रमाथिभावाच्च स्रोतोभ्यश्च्यावयन्ति ते
कफं शुद्धैश्च तैः पुष्टिं कुर्यात्सम्यग् वहन् रसः १५८
चविकात्रिफलाभार्गीदशमूलैः सचित्रकैः
कुलत्थपिप्पली मूलपाठाकोलयवैर्जले १५९
शृतैर्नागरदुःस्पर्शापिप्पली शठिपौष्करैः
पिष्टैः कर्कटशृङ्ग्या च समैः सर्पिर्विपाचयेत् १६०
सिद्धेऽस्मिंश्चूर्णितौ क्षारौ द्वौ पञ्च लवणानि च
दत्त्वा युक्त्या पिबेन्मात्रां क्षयकासनिपीडितः १६१
कासमर्दाभयामुस्तापाठाकट् फलनागरैः
पिप्पल्या कटुरोहिण्या काश्मर्या सुरसेन च १६२
अक्षमात्रैर्घृतप्रस्थं क्षीरद्राक्षारसाढके
पचेच्छोषज्वरप्लीहसर्वकासहरं शिवम् १६३
वृषव्याघ्रीगुडूचीनां पत्रमूलफलाङ्कुरात्
रसकल्कैर्घृतं पक्वं हन्ति कासज्वरारुचीः १६४
द्विगुणे दाडिमरसे सिद्धं वा व्योषसंयुतम्
पिबेदुपरि भुक्तस्य यवक्षारयुतं नरः १६५
पिप्पलीगुडसिद्धं वा छागक्षीरयुतं घृतम्
एतान्यग्निविवृद्ध्यर्थं सर्पींषि क्षयकासिनाम् १६६
स्युर्दोषबद्धकण्ठोरःस्रोतसां च विशुद्धये
प्रस्थोन्मिते यवक्वाथे विंशतिं विजयाः पचेत् १६७
स्विन्ना मृदित्वा तास्तस्मिन्पुराणात्षट्पलं गुडात्

पिप्पल्या द्विपलं कर्षं मनोह्वाया रसाञ्जनात् १६८
दत्त्वाऽधाढ्कं पचेद्भूयः स लेहः श्वासकासजित्
श्वाविधां सूचयो दग्धाः सघृतक्षौद्रशर्कराः १६९
श्वासकासहराबर्हिपादौ वा मधुसर्पिषा
एरण्डपत्रक्षारं वा व्योषतैलगुडान्वितम् १७०
लेहयेत् क्षारमेवं वा सुरसैरण्डपत्रजम्
लिह्यात् त्र्यूषणचूर्णं वा पुराणगुडसर्पिषा १७१
पद्मकं त्रिफला व्योषं विडङ्गं देवदारु च
बला रास्ना च तच्चूर्णं समस्तं समशर्करम् १७२
खादेन्मधुघृताभ्यां वा लिह्यात्कासहरं परम्
तद्वन्मरिचचूर्णं वा सघृतक्षौद्रशर्करम् १७३
पथ्याशुण्ठीघनगुडैर्गुटिकां धारयेन्मुखे
सर्वेषु श्वासकासेषु केवलं वा बिभीतकम् १७४
पत्रकल्कं घृतभृष्टं तिल्वकस्य सशर्करम्
पेया वोत्कारिका छर्दितृट्कासामातिसारजित् १७५
कण्टकारीरसे सिद्धो मुद्गयूषः सुसंस्कृतः
सगौरामलकः साम्लः सर्वकासभिषग्जितम् १७६
वातघ्नौषधनिःक्वाथे क्षीरं यूषान् रसानपि
वैष्किरान् प्रातुदान् बैलान् दापयेत्क्षयकासिने १७७
क्षतकासे च ये धूमाः सानुपाना निदर्शिताः
क्षयकासेऽपि ते योज्या वक्ष्यते यच्च यक्ष्मणि १७८
बृंहणं दीपनं चाग्नेः स्रोतसां च विशोधनम्
व्यत्यासात्क्षयकासिभ्यो बल्यं सर्वं प्रशस्यते १७९
सन्निपातोद्भवो घोरः क्षयकासो यतस्ततः
यथादोषबलं तस्य सन्निपातहितं हितम् १८०

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे
चिकित्सितस्थाने कासचिकित्सितं नाम तृतीयोऽध्यायः ३

चतुर्थोऽध्यायः

अथातः श्वासहिध्माचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
श्वासहिध्मा यतस्तुल्यहेत्वाद्याः साधनं ततः
तुल्यमेव तदार्तं च पूर्वं स्वेदैरुपाचरेत् १
स्निग्धैर्लवणतैलाक्तं तैः खेषु ग्रथितः कफः
सुलीनोऽपि विलीनोऽस्य कोष्ठं प्राप्तः सुनिर्हरः २
स्रोतसां स्यान्मृदुत्वं च मरुतश्चानुलोमता
स्विन्नं च भोजयेदन्नं स्निग्धमानूपजै रसैः ३
दध्युत्तरेण वा दद्यात्ततोऽस्मै वमनं मृदु
विशेषात्कासवमथुहृद्ग्रहस्वरसादिने ४
पिप्पलीसैन्धवक्षौद्रयुक्तं वाताविरोधि यत्
निर्हृते सुखमाप्नोति स कफे दुष्टविग्रहे ५
स्रोतःसु च विशुद्धेषु चरत्यविहतोऽनिलः
ध्मानोदावर्ततमके मातुलुङ्गाम्लवेतसैः ६
हिङ्गुपीलुबिडैर्युक्तमन्नं स्यादनुलोमनम्
ससैन्धवं फलाम्लं वा कोष्णं दद्याद्विरेचनम् ७
एते हि कफसंरुद्धगतिप्राणप्रकोपजाः
तस्मात्तन्मार्गशुद्ध्यर्थमूर्ध्वाधः शोधनं हितम् ८
उदीर्यते भृशतरं मार्गरोधाद्वहज्जलम्
यथा तथाऽनिलस्तस्य मार्गमस्माद्विशोधयेत् ९
अशान्तौ कृतसंशुद्धेर्धूमैर्लीनं मलं हरेत्
हरिद्रापत्रमेरण्डमूलं लाक्षां मनःशिलाम् १०
सदेवदार्वलं मांसी पिष्ट्वा वर्तिं प्रकल्पयेत्
तां घृताक्तां पिबेद्धूमं यवान् वा घृतसंयुतान् ११
मधूच्छिष्टं सर्जरसं घृतं वा गुरु वाऽगुरु
चन्दनं वा तथा शृङ्गं वालान्वा स्नाव वा गवाम् १२
ऋक्षगोधकुरङ्गैणचर्म शृङ्गखुराणि वा
गुग्गुलुं वा मनोह्वां वा शालनिर्यासमेव वा १३
शल्लकीं गुग्गुलुं लोहं पद्मकं वा घृताप्लुतम्

अवश्यं स्वेदनीयानामस्वेद्यानामपि क्षणम् १४
स्वेदयेत्ससिताक्षीर सुखोष्णस्नेहसेचनैः
उत्कारिकोपनाहैश्च स्वेदाध्यायोक्तभेषजैः १५
उरः कण्ठं च मृदुभिः सामे त्वामविधिं चरेत्
अतियोगोद्धतं वातं दृष्ट्वा पवननाशनैः १६
स्निग्धै रसाद्यैर्नात्युष्णैरभ्यङ्गैश्च शमं नयेत्
अनुत्क्लिष्टकफास्विन्नदुर्बलानां हि शोधनात् १७
वायुर्लब्धास्पदो मर्म संशोष्याशु हरेदसून्
कषायलेहस्नेहाद्यैस्तेषां संशमयेदतः १८
क्षीणक्षतातिसारासृक्पित्तदाहानु बन्धजान्
मधुरस्निग्धशीताद्यैर्हिध्मा श्वासानुपाचरेत् १९
कुलत्थदशमूलानां क्वाथे स्युर्जाङ्गला रसाः
यूषाश्च शिग्रुवार्ताककासघ्नवृषमूलकैः २०
पल्लवैर्निम्बकुलकबृहती मातुलुङ्गजैः
व्याघ्रीदुरालभाशृङ्गीबिल्वमध्यत्रिकण्टकैः २१
साभृताग्निकुलत्थैश्च यूषः स्यात्क्वथितैर्जले
तद्वद्रास्नाबृहत्यादिबलामुद्गैः सचित्रकैः २२
पेया च चित्रकाजाजीशृङ्गीसौवर्चलैः कृता
दशमूलेन वा कासश्वासहिध्मारुजापहा २३
दशमूलशठीरास्नाभार्गी बिल्वर्द्धिपौष्करैः
कुलीरशृङ्गीचपला तामलक्यमृतौषधैः २४
पिबेत्कषायं जीर्णेऽस्मिन् पेयां तैरेव साधिताम्
शालिषष्टिकगोधूमयवमुद्गकुलत्थभुक् २५
कासहृद्ग्रहपार्श्वार्तिहिध्माश्वास प्रशान्तये
सक्तून् वाऽकाङ्कुरक्षीरभावितानां समाक्षिकान् २६
यवानां दशमूलादिनिष्क्वाथलुलितान् पिबेत्
अन्ने च योजयेत् क्षारहिङ्ग्वाज्यविडदाडिमान् २७
सपौष्करशठीव्योष मातुलुङ्गाम्लवेतसान्
दशमूलस्य वा क्वाथमथवा देवदारुणः २८
पिबेद्वा वारुणीमण्डं हिध्माश्वासी पिपासितः

पिप्पलीपिप्पली मूलपथ्याजन्तुघ्नचित्रकैः २९
कल्कितैर्लेपिते रूढे निःक्षिपेद्घृभाजने
तक्रं मासस्थितं तद्धि दीपनं श्वासकासजित् ३०
पाठां मधुरसां दारु सरलं च निशि स्थितम्
सुरामण्डेऽल्पलवणं पिबेत्प्रसृतसम्मितम् ३१
भार्गीशुण्ठ्यौ सुखाम्भोभिः क्षारं वा मरिचान्वितम्
स्वक्वाथपिष्टां लुलितां बाष्पिकां पाययेत वा ३२
स्वरसः सप्तपर्णस्य पुष्पाणां वा शिरीषतः
हिध्माश्वासे मधुकणायुक्तः पित्तकफानुगे ३३
उत्कारिका तुगाकृष्णा मधूलीघृतनागरैः
पित्तानुबन्धे योक्तव्या पवने त्वनुबन्धिनि ३४
श्वाविच्छशामिषकणा घृतशल्यकशोणितैः
सुवर्चलारसव्योषसर्पिर्भिः सहितं पयः ३५
अनु शाल्योदनं पेयं वातपित्तानुबन्धिनि
चतुर्गुणाम्बुसिद्धं वा छागं सगुडनागरम् ३६
पिप्पलीमूलमधुकगुडगोश्व शकृद्रसान्
हिध्माभिष्यन्दकासघ्नान् लिह्यान्मधुघृतान्वितान् ३७
गोगजाश्ववराहोष्ट्रखर मेषाजविड्रसम्
समध्वेकैकशो लिह्याद्बहुश्लेष्माऽथवा पिबेत् ३८
चतुष्पाच्चर्मरोमास्थिखुरशृङ्गोद्भवां मषीम्
तथैव वाजिगन्धाया लिह्याच्छ्वासी कफोल्बणः ३९
शठीपौष्करधात्रीर्वा पौष्करं वा कणान्वितम्
गैरिकाञ्जनकृष्णा वा स्वरसं वा कपित्थजम् ४०
रसेन वा कपित्थस्य धात्रीसैन्धवपिप्पलद्यः
घृतक्षौद्रेण वा पथ्याविडङ्गोषणपिप्पलद्यः ४१
कोललाजामलद्राक्षापिप्पलीनागराणि वा
गुडतैलनिशाद्राक्षाकणारास्नोषणानि वा ४२
पिबेद्रसाम्बुमद्याम्लै र्लेहौषधरजांसि वा
जीवन्तीमुस्तसुरसत्वगेलाद्वय पौष्करम् ४३
चण्डातामलकीलोहभार्गी नागरवालकम्

कर्कटाख्याशठीकृष्णानाग केसरचोरकम् ४४
उपयुक्तं यथाकामं चूर्णं द्विगुणशर्करम्
पार्श्वरुग्ज्वरकासघ्नं हिध्माश्वासहरं परम् ४५
शठीतामलकीभार्ङ्गी चण्डावालकपौष्करम्
शर्कराष्टगुणं चूर्णंहिध्माश्वासहरं परम् ४६
तुल्यं गुडं नागरं च भक्षयेन्नावयेत वा
लशुनस्य पलाण्डोर्वा मूलं गृञ्जनकस्य वा ४७
चन्दनाद्वा रसं दद्यान्नारीक्षीरेण नावनम्
स्तन्येन मक्षिकाविष्ठामलक्तकरसेन वा ४८
ससैन्धवं घृताच्छं वा सिद्धं स्तन्येन वा घृतम्
कल्कितैर्मधुरद्रव्यैस्तत्पिबेन्नावयेत वा ४९
सकृदुष्णं सकृच्छीतं व्यत्यासात् ससितामधु
तद्वत्पयस्तथा सिद्धमधोभागौषधैर्घृतम् ५०
कणासौवर्चलक्षारवयस्थाहिङ्गुचोरकैः
सकायस्थैर्घृतं मस्तुदशमूलरसे पचेत् ५१
तत्पिबेज्जीवनीयैर्वा लिह्यात्समधु साधितम्
तेजोवत्यभया कुष्ठं पिप्पली कटुरोहिणी ५२
भूतीकं पौष्करं मूलं पलाशश्चित्रकः शठी
पटुद्वयं तामलकी जीवन्ती बिल्वपेशिका ५३
वचा पत्रं च तालीसं कर्षांशैस्तैर्विपाचयेत्
हिङ्गुपादैर्घृतप्रस्थं पीतमाशु निहन्ति तत् ५४
शाखानिलार्शो ग्रहणीहिध्माहृत्पार्श्ववेदनाः
अर्धांशेन पिबेत्सर्पिः क्षारेण पटुनाऽथवा ५५
धान्वन्तरं वृषघृतं दाधिकं हपुषादि वा
शीताम्बुसेकः सहसा त्रासविक्षेपभीशुचः ५६
हर्षेर्ष्योच्छ्वासरोधाश्च हितं कीटैश्च दंशनम्
यत्किञ्चित्कफवातघ्नमुष्णं वातानुलोमनम् ५७
तत्सेव्यं प्रायशो यच्च सुतरां मारुतापहम्
सर्वेषां बृंहणे ह्यल्पः शक्यश्च प्रायशो भवेत् ५८
नात्यर्थं शमनेऽपायो भृशोऽशक्यश्च कर्षणे

शमनैर्बृंहणैश्चातो भूयिष्ठं तानुपाचरेत् ५८
कासश्वासक्षयच्छर्दिहिध्माश्चान्योन्यभेषजैः ५९॥१२
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे
चिकित्सितस्थाने श्वासहिध्माचिकित्सितं नाम चतुर्थोऽध्यायः ४

पञ्चमोऽध्यायः

अथातो राजयक्ष्मादिचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
बलिनो बहुदोषस्य स्निग्धस्विन्नस्य शोधनम्
ऊर्ध्वाधो यक्ष्मिणः कुर्यात्सस्नेहं यन्न कर्शनम् १
पयसा फलयुक्तेन मधुरेण रसेन वा
सर्पिष्मत्या यवाग्वा वा वमनद्रव्यसिद्धया २
वमेत् विरेचनं दद्यात्त्रिवृच्छ्यामानृपद्रुमान्
शर्करामधुसर्पिर्भिः पयसा तर्पणेन वा ३
द्राक्षाविदारीकाश्मर्यमांसानां वा रसैर्युतान्
शुद्धकोष्ठस्य युञ्जीत विधिं बृंहणदीपनम् ४
हृद्यानि चान्नपानानि वातघ्नानि लघूनि च
शालिषष्टिकगोधूमयवमुद्गं समोषितम् ५
लिघुमचािच्युितवीर्यं च सुजरं बलकृच्च यत्
आजं क्षीरं घृतं मांसं क्रव्यान्मांसं च शोषजित्
काकोलूकवृकद्वीपिगवाश्वनकुलोरगम् ६
गृध्रभासखरोष्ट्रं च हितं छद्मोपसंहितम्
ज्ञातं जुगुप्सितं तद्धि छर्दिषे न बलौजसे ७
मृगाद्याः पित्तकफयोः पवने प्रसहादयः
वेसवारीकृताः पथ्या रसादिषु च कल्पिताः ८
भृष्टाः सर्षपतैलेन सर्पिषा वा यथायथम्
रसिका मृदवः स्निग्धाः पटुद्रव्याभिसंस्कृताः ९
हिता मौलककौलत्थास्तद्वद्यूषाश्च साधिताः
सपिप्पलीकं सयवं सकुलत्थं सनागरम् १०

सदाडिमं सामलकं स्निग्धमाजं रसं पिबेत्
तेन षडिवनिवर्तन्ते विकाराः पीनसादयः ११
पिबेच्च सुतरां मद्यं जीर्णं स्रोतोविशोधनम्
पित्तादिषु विशेषेण मध्वरिष्टाच्छवारुणीः १२
सिद्धं वा पञ्चमूलेन तामलक्याऽथवा जलम्
पर्णिनीभिश्चतसृभिर्धान्यनागरकेण वा १३
कल्पयेच्चानुकूलोऽस्य तेनान्नं शुचि यत्नवान्
दशमूलेन पयसा सिद्धं मांसरसेन वा १४
बलागर्भं घृतं योज्यं क्रव्यान्मांसरसेन वा
सक्षौद्रं पयसा सिद्धं सर्पिर्दशगुणेन वा १५
जीवन्तीं मधुकं द्राक्षां फलानि कुटजस्य च
पुष्कराह्वं शठीं कृष्णां व्याघ्रीं गोक्षुरकं बलाम् १६
नीलोत्पलं तामलकीं त्रायमाणां दुरालभाम्
कल्कीकृत्य घृतं पक्वं रोगराजहरं परम् १७
घृतं खर्जूरमृद्वीकामधुकैः सपरूषकैः
सपिप्पलीकं वैस्वर्यकासश्वासज्वरापहम् १८
दशमूलशृतात्क्षीरात्सर्पिर्यदुदियान्नवम्
सपिप्पलीकं सक्षौद्रं तत्परं स्वरबोधनम् १९
शिरःपार्श्वांसशूलघ्नं कासश्वासज्वरापहम्
पञ्चभिः पञ्चमूलैर्वा शृताद्यदुदियाद्घृतम् २०
पञ्चानां पञ्चमूलानां रसे क्षीरचतुर्गुणे
सिद्धं सर्पिर्जयत्येतद्यक्ष्मणः सप्तकं बलम् २१
पञ्चकोलयवक्षारषट्पलेन पचेद्घृतम्
प्रस्थोन्मितं तुल्यपयः स्रोतसां तद्विशोधनम् २२
गुल्मज्वरोदरप्लीह ग्रहणीपाण्डुपीनसान्
श्वासकासाग्निसदन श्वयथूर्ध्वानिलाञ्जयेत् २३
रास्नाबलागोक्षुरक स्थिरावर्षाभुवारिणि
जीवन्तीपिप्पलीगर्भं सक्षीरं शोषजिद्घृतम् २४
अश्वगन्धाशृतात्क्षीराद्घृतं च ससितापयः
साधारणामिषतुलां तोयद्रोणद्वये पचेत् २५

तेनाष्टभागशेषेण जीवनीयैः पलोन्मितैः
साधयेत्सर्पिषः प्रस्थं वातपित्तामयापहम् २६
मांससर्पिरिदं पीतं युक्तं मांसरसेन वा
कासश्वास्वरभ्रंशशोष हृत्पार्श्वशूलजित् २७
एलाजमोदात्रिफला सौराष्ट्रीव्योषचित्रकान्
सारानरिष्टगायत्रीशाल बीजकसम्भवान् २८
भल्लातकं विडङ्गं च पृथगष्टपलोन्मितम्
सलिले षोडशगुणे षोडशांशस्थितं पचेत् २९
पुनस्तेन घृतप्रस्थं सिद्धे चास्मिन्पलानि षट्
तवक्षीर्याः क्षिपेत्त्रिंशत्सिताया द्विगुणं मधु ३०
घृतात्त्रिजातात्त्रिपलं ततो लीढं खजाहतम्
पयोनुपानं तत्प्राह्णे रसायनमयन्त्रणम् ३१
मेध्यं चक्षुष्यमायुष्यं दीपनं हन्ति चाचिरात्
मेहगुल्मक्षयव्याधि पाण्डुरोगभगन्दरान् ३२
ये च सर्पिर्गुडाः प्रोक्ताः क्षते योज्याः क्षयेऽपि ते
त्वगेलापिप्लीक्षीरीशर्करा द्विगुणाः क्रमात् ३३
चूर्णिता भक्षिताः क्षौद्रसर्पिषा वाऽवलेहिताः
स्वर्याः कासक्षयश्वासपार्श्वरुक्कफनाशनाः ३४
अथ स्वरसादचिकित्सितम्
विशेषात्स्वरसादेऽस्य नस्यधूमादि योजयेत्
तत्रापि वातजे कोष्णं पिबेदौत्तरभक्तिकम् ३५
कासमर्दकवार्ताकीमार्कव स्वरसैर्घृतम्
साधितं कासजित्स्वर्यं सिद्धमार्तगलेन वा ३६
बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम्
तैलं वा मधुकद्राक्षापिप्पलीकृमिनुत्फलैः ३७
हंसपाद्याश्च मूलेन पक्वं नस्तो निषेचयेत्
सुखोदकानुपानं च ससर्पिष्कं गुडौदनम् ३८
अश्नीयात्पायसं चैवं स्निग्धं स्वेदं नियोजयेत्
पित्तोद्भवे पिबेत्सर्पिः शृतशीतपयोनुपः ३९
क्षीरिवृक्षाङ्कुरक्वाथकल्कसिद्धं समाक्षिकम्

अश्नीयाच्च ससर्पिष्कं यष्टीमधुकपायसम् ४०
बलाविदारिगन्धाभ्यां विदार्या मधुकेन च
सिद्धं सलवणं सर्पिर्नस्यं स्वर्यमनुत्तमम् ४१
प्रपौण्डरीकं मधुकं पिप्पली बृहती बला
साधितं क्षीरसर्पिश्च तत्स्वर्यं नावनं परम् ४२
लिह्यान्मधुरकाणां च चूर्णं मधुघृताप्लुतम्
पिबेत्कटूनि मूत्रेण कफजे रूक्षभोजनः ४३
कट्फलामलकव्योषं लिह्यात्तैलमधुप्लुतम्
व्योषक्षाराग्निचविकाभार्गीपथ्यामधूनि वा ४४
यवैर्यवागूं यमके कणाधात्रीकृतां पिबेत्
भुक्त्वाऽद्यात्पिप्पलद्यं शुण्ठीं तीक्ष्णं वा वमनं भजेत् ४५
शर्कराक्षौद्रमिश्राणि शृतानि मधुरैः सह
पिबेत्पयांसि यस्योच्चैर्वदतोऽभिहतः स्वरः ४६
इति स्वरसादचिकित्सितम्
अथारोचकचिकित्सितम्
विचित्रमन्नमरुचौ हितैरुपहितं हितम्
बहिरन्तर्मृजा चित्तनिर्वाणं हृद्यमौषधम् ४७
द्वौ कालौ दन्तपवनं भक्षयेन्मुखधावनैः
कषायैः क्षालयेदास्यं धूमं प्रायोगिकं पिबेत् ४८
तालीसचूर्णवटकाः सकर्पूरसितोपलाः
शाशाङ्कंकिरणाख्याश्च भक्ष्या रुचिकराः परम् ४९
वातादरोचके तत्र पिबेच्चूर्णं प्रसन्नया
हरेणुकृष्णाकृमिजिद्द्राक्षासैन्धवनागरात् ५०
एलाभार्गीयवक्षारहिङ्गुयुक्ताद्घृतेन वा
छर्दयेद्वा वचाम्भोभिः पित्ताच्च गुडवारिभिः ५१
लिह्याद्वा शर्करासर्पिर्लवणोत्तममाक्षिकम्
कफाद्वमेन्निम्बजलैर्दीप्यकारग्वधोदकम् ५२
पानं समध्वरिष्टाश्च तीक्ष्णाः समधुमाधवाः
पिबेच्चूर्णं च पूर्वोक्तं हरेणवाद्युष्णवारिणा ५३
एलात्वङ्नागकुसुमतीक्ष्ण कृष्णामहौषधम्

भागवृद्धं क्रमाच्चूर्णं निहन्ति समशर्करम् ५४
प्रसेकारुचिहृत्पार्श्वकासश्वास गलामयान्
यवानीतित्तिडीकाम्लवेत सौषधदाडिमम् ५५
कृत्वा कोलं च कर्षांशं सितायाश्च चतुष्पलम्
धान्यसौवर्चलाजाजीवराङ्गं चार्धकार्षिकम् ५६
पिप्पलीनां शतं चैकं द्वे शते मरिचस्य च
चूर्णमेतत्परं रुच्यं हृद्यं ग्राहि हिनस्ति च ५७
विबन्धकासहृत्पार्श्वप्लीहार्शो ग्रहणीगदान्
तालीसपत्रं मरिचं नागरं पिप्पली शुभा ५८
यथोत्तरं भागवृद्ध्या त्वगेले चार्धभागिके
तद्रुच्यं दीपनं चूर्णं कणाष्टगुणशर्करम् ५९
कासश्वासारुचिच्छर्दिप्लीहहृत्पार्श्व शूलनुत्
पाण्डुज्वरातिसारघ्नं मूढवातानुलोमनम् ६०
इत्यरोचकचिकित्सितम्
अर्कामृताक्षारजले शर्वरीमुषितैर्यवैः
प्रसेके कल्पितान्सक्तून् भक्षयांश्चाद्याद्बली वमेत् ६१
कटुतिक्तैस्तथा शूल्यं भक्षयेज्जाङ्गलं पलम्
शुष्कांश्च भक्षयान् सुलघूंश्चणकादिरसानुपः ६२
श्लेष्मणोऽतिप्रसेकेन वायुः श्लेष्माणमस्यति
कफप्रसेकं तं विद्वान्स्निग्धोष्णैरेव निर्जयेत् ६३
पीनसेऽपि क्रममिमं वमथौ च प्रयोजयेत्
विशेषात्पीनसेऽभ्यङ्गान् स्नेहान् स्वेदांश्च शीलयेत् ६४
स्निग्धानुत्कारिकापिण्डैः शिरः पार्श्वगलादिषु
लवणाम्लकटूष्णांश्च रसान् स्नेहोपसंहितान् ६५
शिरोंसपार्श्वशूलेषु यथादोषविधिं चरेत्
औदकानूपपिशितैरुपनाहाः सुसंस्कृताः ६६
तत्रेष्टाः सचतुःस्नेहाः दोषसंसर्ग इष्यते
प्रलेपो नतयष्ट्याह्वशताह्वाकुष्ठचन्दनैः ६७
बलारास्नातिलैस्तद्वत्स सर्पिर्मधुकोत्पलैः
पुनर्नवाकृष्णगन्धा बलावीराविदारिभिः ६८

नावनं धूमपानानि स्नेहाश्चौत्तरभक्तिकाः
तैलान्यभ्यङ्गयोगीनि बस्तिकर्म तथा परम् ६९
शृङ्गाद्यैर्वा यथादोषं दुष्टमेषां हरेदसृक्
प्रदेहः सघृतैः श्रेष्ठः पद्मकोशीरचन्दनैः ७०
दूर्वामधुकमञ्जिष्ठाकेसरैर्वा घृताप्लुतैः
वटादिसिद्धतैलेन शतधौतेन सर्पिषा ७१
अभ्यङ्गः पयसा सेकः शस्तश्च मधुकाम्बुना
प्रायेणोपहताग्नित्वात्सपिच्छमतिसार्यते ७२
तस्यातिसारग्रहणीविहितं हितमौषधम्
पुरीषं यत्नतो रक्षेच्छुष्यतो राजयक्ष्मिणः ७३
सर्वधातुक्षयार्तस्य बलं तस्य हि विड्बलम्
मांसमेवाश्नतो युक्त्या मार्द्वीकं पिबतोऽनु च ७४
अविधारितवेगस्य यक्ष्मा न लभतेऽन्तरम्
सुरां समण्डां मार्द्वीकमरिष्टान्सीधुमाधवान् ७५
यथार्हमनुपानार्थं पिबेन्मांसानि भक्षयन्
स्रोतोविबन्धमोक्षार्थं बलौजःपुष्टये च तत् ७६
स्नेहक्षीराम्बुकोष्ठेषु स्वभ्यक्तमवगाहयेत्
उत्तीर्णं मिश्रकैः स्नेहैर्भूयोऽभ्यक्तं सुखैः करैः ७७
मृद्नीयात्सुखमासीनं सुखं चोद्वर्तयेत्परम्
जीवन्तीं शतवीर्यां च विकसां सपुनर्नवाम् ७८
अश्वगन्धामपामार्गं तर्कारीं मधुकं बलाम्
विदारीं सर्षपान् कुष्ठं तण्डुलानतसीफलम् ७९
माषांस्तिलांश्च किण्वं च सर्वमेकत्र चूर्णयेत्
यवचूर्णं त्रिगुणितं दध्ना युक्तं समाक्षिकम् ८०
एतदुद्वर्तनं कार्यं पुष्टिवर्णबलप्रदम्
गौरसर्षपकल्केन स्नानीयौषधिभिश्च सः ८१
स्नायादृतुसुखैस्तोयै र्जीवनीयोपसाधितैः
गन्धमाल्यादिकां भूषामलक्ष्मीनाशनीं भजेत् ८२
सुहृदां दर्शनं गीतवादित्रोत्सवसंश्रुतिः
बस्तयः क्षीरसर्पींषि मद्यमांससुशीलता ८३

दैवव्यपाश्रयं तत्तदथर्वोक्तं च पूजितम् ८३-२

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
चतुर्थे
चिकित्सितस्थाने राजयक्ष्मादिचिकित्सितं नाम पञ्चमोऽध्यायः ५

षष्ठोऽध्यायः

अथातश्छर्दिहृद्रोगतृष्णाचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
आमाशयोत्क्लेशभवाः प्रायश्छर्द्यो हितं ततः
लङ्घनं प्रागृते वायोर्वमनं तत्र योजयेत् १
बलिनो बहुदोषस्य वमतः प्रततं बहु
ततो विरेकं क्रमशो हृद्यं मद्यैः फलाम्बुभिः २
क्षीरैर्वा सह स ह्यूर्ध्वं गतं दोषं नयत्यधः
शमनं चौषधं रूक्षदुर्बलस्य तदेव तु ३
परिशुष्कं प्रियं सात्म्यमन्नं लघु च शस्यते
उपवासस्तथा यूषा रसाः काम्बलिकाः खलाः ४
शाकानि लेहा भोज्यानि रागषाडवपानकाः
भक्ष्याः शुष्का विचित्राश्च फलानि स्नानघर्षणम् ५
गन्धाः सुगन्धयो गन्धफलपुष्पान्नपानजाः
भुक्तमात्रस्य सहसा मुखे शीताम्बुसेचनम् ६
हन्ति मारुतजां छर्दिं सर्पिः पीतं ससैन्धवम्
किञ्चिदुष्णं विशेषेण सकासहृदयद्रवाम् ७
व्योषत्रिलवणाढ्यं वा सिद्धं वा दाडिमाम्बुना
सशुण्ठीदधिधान्येन शृतं तुल्याम्बु वा पयः ८
व्यक्तसैन्धवसर्पिर्वा फलाम्लो वैष्किरो रसः
स्निग्धं च भोजनं शुण्ठीदधिदाडिमसाधितम् ९
कोष्णं सलवणं चात्र हितं स्नेहविरेचनम्
पित्तजायां विरेकार्थं द्राक्षेक्षुस्वरसैस्त्रिवृत् १०
सर्पिर्वा तैल्वकं योज्यं वृद्धं च श्लेष्मधामगम्
ऊर्ध्वमेव हरेत् पित्तं स्वादुतिक्तैर्विशुद्धिमान् ११

पिबेन्मन्थं यवागूं वा लाजैः समधुशर्कराम्
मुद्गजाङ्गलजैरद्याद्व्यञ्जनैः शालिषष्टिकम् १२
मृद्भृष्टलोष्टप्रभवं सुशीतं सलिलं पिबेत्
मुद्गोशीरकणाधान्यैः सह वा संस्थितं निशाम् १३
द्राक्षारसं रसं वेक्षोर्गुडूच्यम्बु पयोऽपि वा
जम्ब्वाम्रपल्लवोशीरवटशुङ्गावरोहजः १४
क्वाथः क्षौद्रयुतः पीतः शीतो वा विनियच्छति
छर्दि ज्वरमतीसारं मूर्च्छां तृष्णां च दुर्जयाम् १५
धात्रीरसेन वा शीतं पिबेन्मुद्गदलाम्बु वा
कोलमज्जसितालाजामक्षिकाविट्कणाञ्जनम् १६
लिह्यात्क्षौद्रेण पथ्यां वा द्राक्षां वा बदराणि वा
कफजायां वमेन्निम्बकृष्णापिण्डीतसर्षपैः १७
युक्तेन कोष्णतोयेन दुर्बलं चोपवासयेत्
आरग्वधादिनिर्यूहं शीतं क्षौद्रयुतं पिबेत् १८
मन्थान् यवैर्वा बहुशश्छर्दिघ्नौषधभावितैः
कफघ्नमन्नं हृद्यं च रागाः सार्जकभूस्तृणाः १९
लीढं मनःशिलाकृष्णामरिचं बीजपूरकात्
स्वरसेन कपित्थस्य सक्षौद्रेण वमिं जयेत् २०
खादेत्कपित्थं सव्योषं मधुना वा दुरालभाम्
लिह्यान्मरिचचोचैलागोशकृद्रसमाक्षिकम् २१
अनुकूलोपचारेण याति द्विष्टार्थजा शमम्
कृमिजा कृमिहृद्रोगगदितैश्च भिषग्जितैः २२
यथास्वं परिशेषाश्च तत्कृताश्च तथाऽमयाः
छर्दिप्रसङ्गेन हि मातरिश्वा धातुक्षयात्कोपमुपैत्यवश्यम्
कुर्यादतोऽस्मिन् वमनातियोगप्रोक्तं विधिं स्तम्भनबृंहणीयम् २३
सर्पिगुडा मांसरसा घृतानि कल्याणकत्र्यूषणजीवनानि
पयांसि पथ्योपहितानि लेहाश्छर्दिं प्रसक्तां प्रशमं नयन्ति २४
इति छर्दिचिकित्सितम्
अथ हृद्रोगचिकित्सितम्
हृद्रोगे वातजे तैलं मस्तुसौवीरतक्रवत् २५

पिबेत्सुखोष्णं सबिडं गुल्मानाहार्तिजिच्च तत्
तैलं च लवणैः सिद्धं समूत्राम्लं तथागुणम् २६
बिल्वं रास्नां यवान् कोलं देवदारुं पुनर्नवाम्
कुलत्थान् पञ्चमूलं च पक्त्वा तस्मिन्पचेज्जले २७
तैलं तन्नावने पाने बस्तौ च विनियोजयेत्
शुण्ठीवयस्थालवणकायस्थाहिङ्गुपौष्करैः २८
पथ्यया च शृतं पार्श्वहृद्रुजागुल्मजिद्घृतम्
सौवर्चलस्य द्विपले पथ्यापञ्चाशदन्विते २९
घृतस्य साधितः प्रस्थो हृद्रोगश्वासगुल्मजित्
दाडिमं कृष्णलवणं शुण्ठी हिङ्ग्वम्लवेतसम् ३०
अपतन्त्रकहृद्रोगश्वासघ्नं चूर्णमुत्तमम्
पुष्कराह्वशठीशुण्ठी बीजपूरजटाभयाः ३१
पीताः कल्कीकृताः क्षारघृताम्ललवणैर्युताः
विकर्तिकाशूलहराः क्वाथः कोष्णश्च तद्गुणः ३२
यवानीलवणक्षारवचाजाज्यौषधैः कृतः
सपूतिदारुबीजाह्वपलाश शठिपौष्करैः ३३
यिवक्षारो यवानी च पिबेदुष्णेन वारिणा
एतेन वातजं शूलं गुल्मं चैव चिरोत्थितम् १
भिद्यते सप्तरात्रेण पवनेन यथा घनः
पञ्चकोलशठीपथ्यागुडबीजाह्व पौष्करम्
वारुणीकल्कितं भृष्टं यमके लवणान्वितम् ३४
हृत्पार्श्वयोनिशूलेषु खादेद्गुल्मोदरेषु च
स्निग्धाश्चेह हिताः स्वेदाः संस्कृतानि घृतानि च ३५
लघुना पञ्चमूलेन शुण्ठ्या वा साधितं जलम्
वारुणीदधिमण्डं वा धान्याम्लं वा पिबेत्तृषि ३६
सायामस्तम्भशूलामे हृदि मारुतदूषिते
क्रियैषा सद्रवायामप्रमोहे तु हिता रसाः ३७
स्नेहाढ्यास्तित्तिरिक्रौञ्च शिखिवर्तकदक्षजाः
बलातैलं सहृद्रोगः पिबेद्वा सुकुमारकम् ३८
यष्ट्याह्वशतपाकं वा महास्नेहं तथोत्तमम्

रास्नाजीवकजीवन्तीबलाव्याघ्रीपुनर्नवैः ३९
भार्गीस्थिरावचाव्योषैर्महास्नेहं विपाचयेत्
दधिपादं तथाम्लैश्च लाभतः स निषेवितः ४०
तर्पणो बृंहणो बल्यो वातहृद्रोगनाशनः
दीप्तेऽग्नौ सद्रवायामे हृद्रोगे वातिके हितम् ४१
क्षीरं दधि गुडः सर्पिरौदकानूपमामिषम्
एतान्येव च वर्ज्यानि हृद्रोगेषु चतुर्ष्वपि ४२
शेषेषु स्तम्भजाड्यामसंयुक्तेऽपि च वातिके
कफानुबन्धे तस्मिंस्तु रूक्षोष्णामाचरेत्क्रियाम् ४३
पैत्ते द्राक्षेक्षुनिर्यासिसिताक्षौद्रपरूषकैः
युक्तो विरेको हृद्यः स्यात्क्रमः शुद्धे च पित्तहा ४४
क्षतपित्तज्वरोक्तं च बाह्यान्तः परिमार्जनम्
कट्वीमधुककल्कं च पिबेत्ससितमम्भसा ४५
श्रेयसीशर्करा द्राक्षाजीवकर्षभकोत्पलैः
बलाखर्जूरकाकोलीमेदायुग्मैश्च साधितम् ४६
सक्षीरं माहिषं सर्पिः पित्तहृद्रोगनाशनम्
प्रपौण्डरीकमधुकविस ग्रन्थिकसेरुकाः ४७
सशुण्ठीशैवलास्ताभिः सक्षीरं विपचेद्घृतम्
शीतं समधु तच्चेष्टं स्वादुवर्गकृतं च यत् ४८
बस्तिं च दद्यात्सक्षौद्रं तैलं मधुकसाधितम्
कफोद्भवे वमेत्स्विन्नः पिचुमन्दवचाम्भसा ४९
कुलत्थधन्वोत्थ रसतीक्ष्णमद्ययवाशनः
पिबेच्चूर्णं वचाहिङ्गुलवणद्वयनागरात् ५०
सैलायवानककणायवक्षारात्सुखाम्बुना
फलधान्याम्लकौलत्थयूष मूत्रासवैस्तथा ५१
पुष्कराह्वाभयाशुण्ठीशठी रास्नावचाकणात्
क्वाथं तथाऽभयाशुण्ठीमाद्रीपीतद्रुकट्फलात् ५२
क्वाथे रोहितकाश्वत्थखदिरोदुम्बरार्जुने
सपलाशवटे व्योषत्रिवृच्चूर्णान्विते कृतः ५३
सुखोदकानुपानश्च लेहः कफविकारहा

श्लेष्मगुल्मोदिताज्यानि क्षारांश्च विविधान् पिबेत् ५४
प्रयोजयेच्छिलाह्वं वा ब्राह्मं वाऽत्र रसायनम्
तथाऽमलकलेहं वा प्राशं वाऽगस्त्यनिर्मितम् ५५
स्याच्छूलं यस्य भुक्तेऽति जीर्यत्यल्पं जरां गते
शाम्येत्स कुष्ठकृमिजिल्लवणद्वयतिल्वकैः ५६
सदेवदार्वतिविषैश्चूर्णमुष्णाम्बुना पिबेत्
यस्य जीर्णेऽधिकं स्नेहैः स विरेच्यः फलैः पुनः ५७
जीर्यत्यन्ने तथा मूलैस्तीक्ष्णैः शूले सदाऽधिके
प्रायोऽनिलो रुद्धगतिः कुप्यत्यामाशये गतः ५८
तस्यानुलोमनं कार्यं शुद्धिलङ्घनपाचनैः
कृमिघ्नमौषधं सर्वं कृमिजे हृदयामये ५९
इति हृद्रोगचिकित्सितम्
अथ तृष्णा चिकित्सितम्
तृष्णासु वातपित्तघ्नो विधिः प्रायेण शस्यते
सर्वासु शीतो बाह्यान्तस्तथा शमनशोधनः ६०
दिव्याम्बु शीतं सक्षौद्रं तद्वद्भौमं च तद्गुणम्
निर्वापितं तप्तलोष्टकपालसिकतादिभिः ६१
सशर्करं वा क्वथितं पञ्चमूलेन वा जलम्
दर्भपूर्वेण मन्थश्च प्रशस्तो लाजसक्तुभिः ६२
वाट्यश्चामयवैः शीतः शर्करामाक्षिकान्वितः
यवागूः शालिभिस्तद्वत्कोद्रवैश्च चिरन्तनैः ६३
शीतेन शीतवीर्यैश्च द्रव्यैः सिद्धेन भोजनम्
हिमाम्बुपरिषिक्तस्य पयसा ससितामधु ६४
रसैश्चानम्ललवणैर्जाङ्गलै र्घृतभर्जितैः
मुद्गादीनां तथा यूषैर्जीवनीयरसान्वितैः ६५
नस्यं क्षीरघृतं सिद्धं शीतैरिक्षोस्तथा रसः
निर्वापणाश्च गण्डूषाः सूत्रस्थानोदिता हिताः ६६
दाहज्वरोक्ता लेपाद्या निरीहत्वं मनोरतिः
महासरिद्ध्रदादीनां दर्शनस्मरणानि च ६७
तृष्णायां पवनोत्थायां सगुडं दधि शस्यते

रसाश्च बृंहणाः शीताः विदार्यादिगणाम्बु च ६८
पित्तजायां सितायुक्तः पक्वोदुम्बरजो रसः
तत्क्वाथो वा हिमस्तद्वत्सारिवादिगणाम्बु वा ६९
तद्विधैश्च गणैः शीतकषायान् ससितामधून्
मधुरैरौषधैस्तद्वत् क्षीरिवृक्षैश्च कल्पितान् ७०
बीजपूरकमृद्वीकावट वेतसपल्लवान्
मूलानि कुशकाशानां यष्ट्याह्वं च जले शृतम् ७१
ज्वरोदितं वा द्राक्षादि पञ्चसाराम्बु वा पिबेत्
कफोद्भवायां वमनं निम्बप्रसववारिणा ७२
बिल्वाढकीपञ्चकोलदर्भ पञ्चकसाधितम्
जलं पिबेद्रजन्या वा सिद्धं सक्षौद्रशर्करम् ७३
मुद्गयूषं च सव्योषपटोलीनिम्बपल्लवम्
यवान्नं तीक्ष्णकवलनस्यलेहांश्च शीलयेत् ७४
सर्वैरामाच्च तद्धन्त्री क्रियेष्टा वमनं तथा
त्र्यूषणारुष्करवचाफलाम्लोष्णाम्बुमस्तुभिः ७५
अन्नात्ययान्मण्डमुष्णं हिमं मन्थं च कालवित्
तृषि श्रमान्मांसरसं मन्थं वा ससितं पिबेत् ७६
आतपात्ससितं मन्थं यवकोलजसक्तुभिः
सर्वाण्यङ्गानि लिम्पेच्च तिलपिण्याककाञ्जिकैः ७७
शीतस्नानाच्च मद्याम्बु पिवेत्तृणमान् गुडाम्बु वा
मद्यादर्धजलं मद्यं स्नातोऽम्ल लवणैर्युतम् ७८
स्नेहतीक्ष्णतराग्निस्तु स्वभावशिशिरं जलम्
स्नेहादुष्णाम्ब्वजीर्णात्तु जीर्णान्मण्डं पिपासितः ७९
पिबेत्स्निग्धान्नतृषितो हिमस्पर्धि गुडोदकम्
गुर्वाद्यन्नेन तृषितः पीत्वोष्णाम्बु तदुल्लिखेत् ८०
क्षयजायां क्षयहितं सर्वं बृंहणमौषधम्
कृशदुर्बलरूक्षाणां क्षीरं छागो रसोऽथवा ८१
क्षीरं च सोर्ध्ववातायां क्षयकासहरैः शृतम्
रोगोपसर्गाज्जातायां धान्याम्बु ससितामधु ८२
पाने प्रशस्तं सर्वा च क्रिया रोगाद्यपेक्षया

तृष्यन् पूर्वामयक्षीणो न लभेत जलं यदि ८३
मरणं दीर्घरोगं वा प्राप्नुयात्त्वरितं ततः
सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत्पुरा ८४
तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्सितुम् ८४॥१२
इति तृष्णारोगचिकित्सितम्

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे
चिकित्सितस्थाने छर्दिहृद्रोगतृष्णाचिकित्सितं नाम षष्ठोऽध्यायः६

सप्तमोऽध्यायः

अथातो मदात्ययादिचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
यं दोषमधिकं पश्येत्तस्यादौ प्रतिकारयेत्
कफस्थानानुपूर्व्या च तुल्यदोषे मदात्यये १
पित्तमारुतपर्यन्तः प्रायेणहि मदात्ययः
हीनमिथ्यातिपीतेन यो व्याधिरुपजायते २
समपीतेन तेनैव स मद्येनोपशाम्यति
मद्यस्य विषसादृश्यात् विषं तूत्कर्षवृत्तिभिः ३
तीक्ष्णादिभिर्गुणैर्योगा द्विषान्तरमपेक्षते
तीक्ष्णोष्णेनातिमात्रेण पीतेनाम्लविदाहिना ४
मद्येनान्नरसक्लेदो विदग्धः क्षारतां गतः
यान् कूर्यान्मदतृणमोहज्वरान्तर्दाहविभ्रमान् ५
मद्योत्क्लिष्टेन दोषेण रुद्धः स्त्रोतःसु मारुतः
सुतीव्रा वेदना याश्च शिरस्यस्थिषु सन्धिषु ६
जीर्णाममद्यदोषस्य प्रकाङ्क्षालाघवे सति
यौगिकं विधिवद्युक्तं मद्यमेव निहन्ति तान् ७
क्षारो हि याति माधुर्यं शीघ्रमम्लोपसंहितः
मद्यमम्लेषु च श्रेष्ठं दोषविष्यन्दनादलम् ८
तीक्ष्णोष्णाद्यैः पुरा प्रोक्तैर्दीपनाद्यैस्तथा गुणैः
सात्म्यत्वाच्च तदेवास्य धातुसाम्यकरं परम् ९

सप्ताहमष्टरात्रं वा कुर्यात्पानात्ययौषधम्
जीर्यत्येतावता पानं कालेन विपथाश्रितम् १०
परं ततोऽनुवध्नाति यो रोगस्तस्य भेषजम्
यथायथं प्रयुञ्जीत कृतपानात्ययौषधः ११
तत्र वातोल्बरणे मद्यं दद्यात्पिष्टकृतं युतम्
बीजपूरकवृक्षाम्लकोलदाडिमदीप्यकैः १२
यवानीहपुषाजाजी व्योषत्रिलवणार्द्रकैः
शूल्यैर्मांसैर्हरितकैः स्नेहवद्भिश्च सक्तुभिः १३
उष्णस्निग्धाम्ललवणा मेद्यमांसरसा हिताः
आम्राम्रातकपेशीभिः संस्कृता रागषाडवाः १४
गोधूममाषविकृतिर्मृदुश्चित्रा मुखप्रिया
आर्द्रिकार्द्रककुल्माषसुक्तमांसादिगर्भिणी १५
सुरभिर्लवणा शीता निर्गदा वाऽच्छवारुणी
स्वरसो दाडिमात् क्वाथः पञ्चमूलात्कनीयसः १६
शुगठीधान्यात्तथा मस्तुसुक्ताम्भोच्छाम्लकाञ्जिकम्
अंभ्यङ्गोद्वर्तनस्नानमुष्णं प्रावरणं घनम् १७
घनश्चागुरुजो धूपः पङ्कश्चागुरुकुङ्कुमः
कुचोरुश्रोणिशालिन्यो यौवनोष्णाङ्गयष्टयः १८
हर्षेणालिङ्गने युक्ताः प्रियाः संवाहनेषु च
पित्तोल्वणे बहुजलं शार्करं मधु वा युतम् १९
रसैर्दाडिम खर्जूर भव्यद्राक्षापरूषजैः
सुशीतं ससितासक्तु योज्यं तादृक् च पानकम् २०
स्वादुवर्गकषायैर्वा युक्तं मद्यं समाक्षिकम्
शालिषष्टिकमश्नीयाच्छशाजैणकपिञ्जलैः २१
सतीनमुद्गामलकपटोलीदाडिमै रसैः
कफपित्तं समुत्क्लिष्टमुल्लिखेत्तृड्विदाहवान् २२
पीत्वाऽम्बु शीतं मद्यं वा भूरीक्षुरससंयुतम्
द्राक्षारसं वा संसर्गी तर्पणादिः परं हितः २३
तथाऽग्निर्दीप्यते तस्य दोषशेषान्नपाचनः
कासे सरक्तनिष्ठीवे पार्श्वस्तनरुजासु च २४

तृष्णायां सविदाहायां सोत्क्लेशे हृदयोरसि
गुडूचीभद्रमुस्तानां पटोलस्याथवा रसम् २५
सशृङ्गबेरं युञ्जीत तित्तिरिप्रतिभोजनम्
तृष्यते चाति बलवद्वातपित्ते समुद्धते २६
दद्याद् द्राक्षारसं पानं शीतं दोषानुलोमनम्
जीर्णेऽद्यान्मधुराम्लेन छागमांसरसेन च २७
तृष्यल्पशः पिबेन्मद्यं मदं रक्षन् बहूदकम्
मुस्तदाडिमलाजाम्बु जलं वा पर्णिनीशृतम् २८
पाटल्युत्पलकन्दैर्वा स्वभावादेव वा हिमम्
मद्यातिपानादब्धातौ क्षीणे तेजसि चोद्धते २९
यः शुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य चेष्टते
पाययेत्कामतोऽम्भस्तं निशीथपवनाहतम् ३०
कोलदाडिमवृक्षाम्लचुक्रीकाचुक्रिकारसः
पञ्चाम्लको मुखालेपः सद्यस्तृष्णां नियच्छति ३१
त्वचं प्राप्तश्च पानोष्मा पित्तरक्ताभिमूर्च्छितः
दाहं प्रकुरुते घोरं तत्रातिशिशिरो विधिः ३२
अशाम्यति रसैस्तृप्ते रोहिणीं व्यधयेच्छिराम्
उल्लेखनोपवासाभ्यां जयेच्छ्लेष्मोल्वणं पिबेत् ३३
शीतं शुण्ठीस्थिरोदीच्यदुःस्पर्शान्यतमोदकम्
निरामं क्षुधितं काले पाययेद्बहुमाक्षिकम् ३४
शार्करं मधु वा जीर्णमरिष्टं सीधुमेव वा
रूक्षतर्पणसंयुक्तं यवानीनागरान्वितम् ३५
यूषेणयवगोधूमं तनुनाऽल्पेन भोजयेत्
उष्णाम्लकटुतिक्तेन कौलत्थेनाल्पसर्पिषा ३६
शुष्कमूलकजैश्छागै रसैर्वा धन्वचारिणाम्
साम्लवेतसवृक्षाम्लपटोलीव्योषदाडिमैः ३७
प्रभूतशुण्ठीमरिच हरितार्द्रकपेशिकम्
बीजपूररसाद्यम्ल भृष्टनीरसवर्तितम् ३८
करीरकरमर्दादि रोचिष्णु बहुशालनम्
प्रव्यक्ताष्टाङ्गलवणं विकल्पितनिमर्दकम् ३९

यथाग्नि भक्षयन् मांसं माधवं निगदं पिबेत्
सितासौवर्चलाजाजीतिन्तिडीकाम्लवेतसम् ४०
त्वगेलामरिचार्धांशमष्टाङ्ग लवणं हितम्
स्रोतोविशुद्ध्यग्निकरं कफप्राये मदात्यये ४१
रूक्षोष्णोद्वर्तनोद्धर्षस्नान भोजनलङ्घनैः
सकामाभिः सह स्त्रीभिर्युक्त्या जागरणेन च ४२
मदात्यः कफप्रायः शीघ्रं समुपशाम्यति
यदिदं कर्म निर्दिष्टं पृथग्दोषबलं प्रति ४३
सन्निपाते दशविधे तच्छेषेऽपि विकल्पयेत्
त्वङ्नागपुष्पमगधामरिचाजाजिधान्यकैः ४४
परूषकमधूकैलासुराह्वैश्च सितान्वितैः
सकपित्थरसं हृद्यं पानकं शशिबोधितम् ४५
मदात्ययेषु सर्वेषु पेयं रुच्यग्निदीपनम्
नाविक्षोभ्य मनो मद्यं शरीरमविहन्य वा ४६
कुर्यान्मदात्ययं तस्मादिष्यत हर्षणी क्रिया
संशुद्धिशमनाद्येषु मददोषः कृतेष्वपि ४७
न चेच्छाम्येत्कफे क्षीणे जाते दौर्बल्यलाघवे
तस्य मद्यविदग्धस्य वातपित्ताधिकस्य च ४८
ग्रीष्मोपतप्तस्य तरोर्यथा वर्षं तथा पयः
मद्यक्षीणस्य हि क्षीणं क्षीरमाश्वेव पुष्यति ४९
ओजस्तुल्यं गुणैः सर्वैर्विपरीतं च मद्यतः
पयसा विहते रोगे बले जाते निवर्तयेत् ५०
क्षीरप्रयोगं मद्यं च क्रमेणाल्पाल्पमाचरेत्
न विक्षयध्वंसकोत्थैः स्पृशेतोपद्रवैर्यथा ५१
तयोस्तु स्याद्घृतं क्षीरं बस्तयो बृंहणाः शिवाः
अभ्यङ्गोद्वर्तनस्नानान्यन्नपानं च वातजित् ५२
युक्तमद्यस्य मद्योत्थो न व्याधिरुपजायते
अतोऽस्य वक्ष्यते योगो यः सुखायैव केवलम् ५३
आश्विनं या महत्तेजो बलं सारस्वतं च या
दधात्यैन्द्रं च या वीर्यं प्रभावं वैष्णवं च या ५४

अस्त्रं मकरकेतोर्या पुरुषार्थो बलस्य या
सौत्रामण्यां द्विजमुखे या हुताशे च हूयते ५५
या सर्वौषधिसम्पूर्णान्मथ्यमानात्सुरासुरैः
महोदधेः समुद्भूता श्रीशशाङ्कामृतैः सह ५६
मधुमाधवमैरेयसीधु गौडासवादिभिः
मदशक्तिमनुज्झन्ती या रूपैर्बहुभिः स्थिता ५७
यामास्वाद्य विलासिन्यो यथार्थं नाम बिभ्रति
कुलाङ्गनाऽपि यां पीत्वा नयत्युद्धतमानसा ५८
अनङ्गालिङ्गितैरङ्गैः क्वापि चेतो मुनेरपि
तरङ्गभङ्गभ्रुकुटीतर्जनै र्मानिनीमनः ५९
एकं प्रसाद्य कुरुते या द्वयोरपिनिर्वृ तिम्
यथाकामं भटावाप्तिपरिहृष्टाप्सरोगणे ६०
तृणवत्पुरुषा युद्धे यामास्वाद्य त्यजन्त्यसून्
यां शीलयित्वाऽपि चिरं बहुधा बहुविग्रहाम् ६१
नित्यं हर्षातिवेगेन तत्पूर्वमिव सेवते
शोकोद्वेगारतिभयैर्यां दृष्ट्वा नाभिभूयते ६२
गोष्ठीमहोत्सवोद्यानं न यस्याः शोभते विना
स्मृत्वा स्मृत्वा च बहुशो वियुक्तः शोचते यया ६३
अप्रसन्नाऽपि या प्रीत्यै प्रसन्ना स्वर्ग एव या
अपीन्द्रं मन्यते दुःस्थं हृदयस्थितया यया ६४
अनिर्देश्यसुखास्वादा स्वयंवेद्यैव या परम्
इति चित्रास्ववस्थासु प्रियामनुकरोति या ६५
प्रियाऽतिप्रियतां याति यत्प्रियस्य विशेषतः
या प्रीतिर्या रतिर्वा वाग् या पुष्टिरिति च स्तुता ६६
देवदानवगन्धर्वयक्ष राक्षसमानुषैः
पानप्रवृत्तौ सत्यां तु तां सुरां विधिना पिबेत् ६७
सम्भवन्ति न ते रोगा मेदोनिलकफोद्भवाः
विधियुक्तादृते मद्याद्ये न सिध्यन्ति दारुणाः ६८
अस्ति देहस्य साऽवस्था यस्यां पानं निवार्यते
अन्यत्र मद्यान्निगदाद्विविधौषधसंस्कृतात् ६९

आनूपं जाङ्गलं मांसं विधिनाऽप्युपकल्पितम्
मद्यं सहायमप्राप्य सम्यक् परिणमेत्कथम् ७०
सुतीव्रमारुतव्याधिघातिनो लशुनस्य च
मद्यमांसवियुक्तस्य प्रयोगे स्यात्कियान् गुणः ७१
निगूढशल्याहरणे शस्त्रक्षाराग्निकर्मणि
पीतमद्यो विषहते सुखं वैद्यविकत्थनाम् ७२
अनलोत्तेजनं रुच्यं शोकश्रमविनोदकम्
न चातः परमस्त्यन्यदारोग्यबलपुष्टिकृत् ७३
रक्षता जीवितं तस्मात्पेयमात्मवता सदा
आश्रितोपाश्रितहितं परमं धर्मसाधनम् ७४
स्नातः प्रणम्य सुरविप्रगुरून् यथास्वं वृत्तिं विधाय च समस्तपरिग्रहस्य
आपानभूमिमथ गन्धजलाभिषिक्ता माहारमण्डपसमीपगतां श्रयेत ७५
स्वास्तृतेऽथ शयने कमनीये मित्रभृत्य रमणीसमवेतः
स्वं यशः कथकचारणसङ्घैं रुद्धतं निशमयन्नतिलोकम् ७६
विलासिनीनां च विलासशोभि गीतं सनृत्यं कलतूर्यघोषैः
काञ्चीकलापैश्चल किङ्किणीभिः क्रीडाविहङ्गैश्च कृतानुनादम् ७७
मणिकनक समुत्थैरावनेयैर्विचित्रैः सजलविविधलेखक्षौमवस्त्रावृताङ्गैः
अपि मुनिजनचित्तक्षोभसम्पादिनीभिश्चकि तहरिणलोलप्रेक्षणीभिः प्रियाभिः
७८
स्तननितम्बकृतादतिगौरवादलसमाकुलमीश्वरसम्भ्रमात्
इति गतं दधतीभिरसंस्थितं तरुणचित्तविलोभनकार्मणम् ७९
यौवनासवमत्ताभि र्विलासाधिष्ठितात्मभिः
सञ्चार्यमाणं युगपत्तन्वङ्गीभिरितस्ततः ८०
तालवृन्तनलिनीदलानिलैः शीतलीकृतमतीव शीतलैः
दर्शनेऽपि विदधद्वशानुगं स्वादितं किमुत चित्तजन्मनः ८१
चूतरसेन्दुमृगैः कृतवासं मल्लिकयोज्ज्वलया च सनाथम्
स्फाटिकशुक्तिगतं सतरङ्गं कान्तमनङ्गमिवोद्वहदङ्गम् ८२
तालीसाद्यं चूर्णमेलादिकं वा हृद्यं प्राश्य प्राग्वयःस्थापनं वा
तत्प्रार्थिभ्यो भूमिभागे सुमृष्टे तोयोन्मिश्रं दापयित्वा ततश्च ८३
धृतिमान् स्मृतिमान्नित्यमनूनाधिकमाचरन्

उचितेनोपचारेण सर्वमेवोपपादयन् ८४
जितविकसितासितसरोजनयनसङ्क्रान्तिवर्धितश्रीकम्
कान्तामुखमिव सौरभहृतमधुपगणं पिबेन्मद्यम् ८५
पीत्वैवं चषकद्वयं परिजनं सन्मान्य सर्वं ततो
गत्वाऽहारभुवं पुरः सुभिषजो भुञ्जीत भूयोऽत्र च
मांसापूपघृतार्द्रकादिहरितैर्युक्तं ससौवर्चलैर्द्विस्त्रिर्वा निशि चाल्पमेव
वनितासंवल्गनार्थं पिबेत् ८६
रहसि दयितामङ्के कृत्वा भुजान्तरपीडना
त्पुलकिततनुं जातस्वेदां सकम्पपयोधराम्
यदि सरभसं शीधोर्वारं न पाययते कृती
किमनुभवति क्लेशप्रायं ततो गृहतन्त्रताम् ८७
वरतनुवक्त्रसङ्गति सुगन्धितरं सरकं
द्रुतमिव पद्मरागमणिमासव रूपधरम्
भवति रतिश्रमेण च मदः पिबतोऽल्पमपि
क्षयमत ओजसः परिहरन् स शयीत परम् ८८
इत्थं युक्त्या पिबन्मद्यं न त्रिवर्गाद्विहीयते
असारसंसारसुखं परमं चाधिगच्छति ८९
एश्वर्यस्योपभोगोऽय स्पृहणीयः सुरैरपि
अन्यथा हि विपत्सु स्यात्पश्चात्तापेन्धनं धनम् ९०
उपभोगेन रहितो भोगवानिति निन्द्यते
निर्मितोऽतिकदर्योऽय विधिना निधिपालकः ९१
तस्माद्व्यवस्थया पानं पानस्य सततं हितम्
जित्वा विषयलुब्धानामिन्द्रियाणां स्वतन्त्रताम् ९२
विधिर्वसुमतामेष भविष्यद्वसवस्तु ये
यथोपपत्ति तैर्मद्यं पातव्यं मात्रया हितम् ९३
यावद् दृष्टेर्न सम्भ्रान्तिर्यावन्न क्षोभते मनः
तावदेव विरन्तव्यं मद्यादात्मवता सदा ९४
अभ्यङ्गोद्वर्तनस्नानवास धूपानुलेपनैः
स्निग्धोष्णैर्भावितश्चान्नैः पानं वातोत्तरः पिबेत् ९५
शीतोपचारैर्विविधैर्मधुरस्निग्ध शीतलैः

पैत्तिको भावितश्चान्नैः पिबन्मद्यं न सीदति ९६
उपचारैरशिशिरैर्यव गोधूमभुक् पिबेत्
श्लैष्मिको धन्वजैर्मांसैर्मद्यं मारिचिकैः सह ९७
तत्र वाते हितं मद्यं प्रायः पैष्टिकगौडिकम्
पित्ते साम्भोमधु कफे मार्द्वीकारिष्टमाधवम् ९८
प्राक् पिबेच्छ्लैष्मिको मद्यं भुक्तस्योपरि पैत्तिकः
वातिकस्तु पिबेन्मध्ये समदोषो यथेच्छया ९९
इति मदात्ययचिकित्सितम्
अथ मदमूर्च्छायचिकित्सितम्
मदेषु वातपित्तघ्नं प्रायो मूर्च्छासु चेष्यते
सर्वत्रापि विशेषेण पित्तमेवोपलक्षयेत् १००
शीताः प्रदेहा मणयः सेका व्यजनमारुताः
सिता द्राक्षेक्षुखर्जूरकाश्मर्यस्वरसाः पयः १०१
सिद्धं मधुरवर्गेण रसा यूषाः सदाडिमाः
षष्टिकाः शालयो रक्ता यवाः सर्पिश्च जीवनम् १०२
कल्याणकं महातिक्तं षट्पलं पयसाऽग्निकः
पिप्पल्यो वा शिलाह्वं वा रसायनविधानतः १०३
त्रिफला वा प्रयोक्तव्या सघृतक्षौद्रशर्करा
प्रसक्तवेगेषु हितं मुखनासावरोधनम् १०४
पिबेद्वा मानुषीक्षीरं तेन दद्याच्च ऋ्नावनम्
मृणालबिसकृष्णा वा लिह्यात्क्षौद्रेण साभयाः १०५
दुरालभां वा मुस्तं वा शीतेन सलिलेन वा
पिबेन्मरिचकोलास्थिमज्जोशीराहिकेसरम् १०६
धात्रीफलरसे सिद्धं पथ्याक्वाथेन वा घृतम्
कुर्यात्क्रियां यथोक्तां च यथादोषबलोदयम् १०७
पञ्चकर्माणि चेष्टानि सेचनं शोणितस्य च
सत्त्वस्यालम्बनं ज्ञानमगृद्धिर्विषयेषु च १०८
मदेष्वतिप्रवृद्धेषु मूर्च्छायेषु च योजयेत्
तीक्ष्णं संन्यासविहितं विषघ्नं विषजेषु च १०९
इति मदमूर्च्छायचिकित्सितम्

अथ सन्न्यासचिकित्सितम्
आशु प्रयोज्यं सन्न्यासे सुतीक्ष्णं नस्यमञ्जनम्
धूमः प्रधमनं तोदः सूचीभिश्च नखान्तरे ११०
केशानां लुञ्चनं दाहो दंशो दशनवृश्चिकैः
कट्वम्लगालनं वक्त्रे कपिकच्छ्ववघर्षणम् १११
उत्थितो लब्धसंज्ञश्च लशुनस्वरसं पिबेत्
खादेत्सव्योषलवणं बीजपूरककेसरम् ११२
लघ्वन्नप्रति तीक्ष्णोष्णमद्यात्स्रोतोविशुद्धये
विस्मापनैः संस्मरणैः प्रियश्रवणदर्शनैः ११३
पटुभिर्गीतवादित्र शब्दैर्व्यायामशीलनैः
स्रंसनोल्लेखनैर्धूमैः शोणितस्यावसेचनैः ११४
उपाचरेत्तं प्रततमनुबन्धभयात्पुनः
तस्य संरक्षितव्यं च मनः प्रलयहेतुतः ११५

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे
चिकित्सितस्थानेमदात्ययादिचिकित्सितं नाम सप्तमोऽध्यायः ७

अष्टमोऽध्यायः

अथातोऽशसां चिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
काले साधारणे व्यभ्रे नातिदुर्बलमर्शसम्
विशुद्धकोष्ठं लघ्वल्पमनुलोमनमाशितम् १
शुचिं कृतस्वस्त्ययनं मुक्तविणमूत्रमव्यथम्
शयने फलके वाऽन्यनरोत्सङ्गे व्यपाश्रितम् २
पूर्वेण कायेनोत्तानं प्रत्यादित्यगुदं समम्
समुन्नतकटीदेशमथ यन्त्रणवाससा ३
सक्थ्योः शिरोधरायां च परिक्षिप्तमृजु स्थितम्
आलम्बितं परिचरैः सर्पिषाऽभ्यक्तपायवे ४
ततोऽस्मै सर्पिषाऽभ्यक्तं निदध्यादृजु यन्त्रकम्
शनैरनुसुखं पायौ ततो दृष्ट्वा प्रवाहणात् ५

यन्त्रे प्रविष्टं दुर्नाम प्लोतगुण्ठितयाऽनु च
शलाकयोत्पीड्य भिषक् यथोक्तविधिना दहेत् ६
क्षारेणैवार्द्रमितरत्क्षारेण ज्वलनेन वा
महद्वा बलिनश्छित्त्वा वीतयन्त्रमथातुरम् ७
स्वभ्यक्तपायुजघनमवगाहे निधापयेत्
निर्वातमन्दिरस्थस्य ततोऽस्याचारमादिशेत् ८
एकैकमिति सप्ताहात्सप्ताहात्समुपाचरेत्
प्राग्दक्षिणं ततो वाममर्शः पृष्ठाग्रजं ततः ९
बह्वर्शसः सुदग्धस्य स्याद्वायोरनुलोमता
रुचिरन्नेऽग्निपटुता स्वास्थ्यं वर्णबलोदयः १०
बस्तिशूले त्वधो नाभेर्लेपयेच्छ्लक्ष्णकल्कितैः
वर्षाभूकुष्ठसुरभि मिशिलोहामराह्वयैः ११
शकृन्मूत्रप्रतीघाते परिषेकावगाहयोः
वरुणालम्बुषैरण्ड गोकण्टकपुनर्नवैः १२
सुषवीसुरभीभ्यां च क्वाथमुष्णं प्रयोजयेत्
सस्नेहमथवा क्षीरं तैलं वा वातनाशनम् १३
युञ्जीतान्नं शकृद्भेदि स्नेहान् वातघ्नदीपनान्
अथाप्रयोज्यदाहस्य निर्गतान् कफवातजान् १४
सस्तम्भकण्डूरुक्शोफानभ्यज्य गुदकीलकान्
विल्वमूलाग्निकक्षारकुष्ठैः सिद्धेन सेचयेत् १५
तैलेनाहिबिडालोष्ट्र वराहवसयाऽथवा
किासीसं सैन्धवं रास्ना शुण्ठी कुष्ठं च लाङ्गली
शिलाभ्रकाश्वमारं च जन्तुहृद्दन्तिचित्रकौ १
हरितालं तथा स्वर्णक्षीरी तैश्च पचेत्समैः
तैलं सुधार्कपयसी गवां मूत्रे चतुर्गुणे २
एतदभ्यङ्गतोऽर्शासि क्षारवत्पातयेद्द्रुतम्
क्षारकर्मकरं ह्येतन्न च दूषयते वलिम् ३
स्वेदयेदनु पिण्डेन द्रवस्वेदेन वा पुनः १६
सक्तूनां पिण्डिकाभिर्वा स्निग्धानां तैलसर्पिषा
रास्नाया हपुषाया वा पिण्डैर्वा कार्ष्णर्यगन्धिकैः १७

अर्कमूलं शमीपत्रं नृकेशाः सर्पकञ्चुकम्
मार्जारचर्म सर्पिश्च धूपनं हितमर्शसाम् १८
तथाऽश्वगन्धा सुरसा वृहती पिप्पली घृतम्
धान्याम्लपिष्टैर्जीमूतबीजैस्तज्ञालकं मृदु १९
लेपितं छायया शुष्कं वर्तिर्गुदजशातनी
सजालमूलजीमूतलेहे वा क्षारसंयुते २०
गुञ्जासूरणकूष्माण्ड बीजैर्वर्तिस्तथागुणा
स्नुक्क्षीरार्द्रनिशालेपस्तथा गोमूत्रकल्कितैः २१
कृकवाकुशकृत्कृष्णा निशागुञ्जाफलैस्तथा
स्नुक्क्षीरपिष्टैः षड्ग्रन्थाहलिनीवारणास्थिभिः २२
कुलीरशृङ्गीविजया कुष्ठारुष्करतुत्थकैः
शिग्रुमूलकजैर्बीजैः पत्रैरश्वघ्ननिम्बजैः २३
पीलुमूलेन बिल्वेन हिङ्गुना च समन्वितैः
कुष्ठं शिरीषबीजानि पिप्पल्यः सैन्धवं गुडः २४
अर्कक्षीरं सुधाक्षीरं त्रिफला च प्रलेपनम्
आर्कं पयः सुधाकाण्डं कटुकालाबुपल्लवाः २५
करञ्जो वस्तमूत्रं च लेपनं श्रेष्ठमर्शसाम्
आनुवासनिकैर्लेपः पिप्पल्याद्यैश्च पूजितः २६
एभिरेवौषधैः कुर्यात्तैलान्यभ्यञ्जनाय च
धूपनालेपनाभ्यङ्गैः प्रस्रवन्ति गुदाङ्कुराः २७
सञ्चितं दुष्टरुधिरं ततः सम्पद्यते सुखी
अवर्तमानमुच्छूनकठिनेभ्यो हरेद्सृक् २८
अर्शोभ्यो जलजाशस्त्रसूचीकूर्चैः पुनः पुनः
शीतोष्णस्निग्धरूक्षैर्हि न व्याधिरुपशाम्यति २९
रक्ते दुष्टे भिषक् तस्माद्रक्तमेवावसेचयेत्
यो जातो गोरसः क्षीराद्वह्निचूर्णावचूर्णितात् ३०
पिबंस्तमेव तेनैव भुञ्जानो गुदजान् जयेत्
कोविदारस्य मूलानां मथितेन रजः पिबन् ३१
अश्नन् जीर्णे च पथ्यानि मुच्यते हतनामभिः
गुदश्वयथुशूलार्तो मन्दाग्निर्गौल्मिकान् पिबेत् ३२

हिङ्ग्वादीननुतक्रं वा खादेद्गुडहरीतकीम्
तक्रेण वा पिबेत्पथ्यावेल्लाग्निकुटजत्वचः ३३
कलिङ्गमगधाज्योतिःसूरणान् वांऽशवर्धितान्
कोष्णाम्बुना वा त्रिपटुव्योषहिङ्ग्वम्लवेतसम् ३४
युक्तं बिल्वकपित्थाभ्यां महौषधबिडेन वा
अरुष्करैर्यवान्या वा प्रदद्यात्तक्रतर्पणम् ३५
दद्याद्वा हपुषाहिङ्गुचित्रकं तक्रसंयुतम्
मासं तक्रानुपानानि खादेत्पीलुफलानि वा ३६
पिबेदहरहस्तक्रं निरन्नो वा प्रकामतः
अत्यर्थं मन्दकायाग्नेस्तक्रमेवावचारयेत् ३७
सप्ताहं वा दशाहं वा मासार्धं मासमेव वा
बलकालविकारज्ञो भिषक् तक्रं प्रयोजयेत् ३८
सायं वा लाजसक्तूनां दद्यात्तक्रावलेहिकाम्
जीर्णे तक्रे प्रदद्याद्वा तक्रपेयां ससैन्धवाम् ३९
तक्रानुपानं सस्नेहं तक्रौदनमतः परम्
यूषै रसैर्वा तक्राढ्यैः शालीन् भुञ्जीत मात्रया ४०
रूक्षमर्धोद्धृतस्नेहं यतश्चानुद्धृतं घृतम्
तक्रं दोषाग्निबलवित्त्रिविधं तत्प्रयोजयेत् ४१
न विरोहन्ति गुदजाः पुनस्तक्रसमाहताः
निषिक्तं तद्धि दहति भूमावपि तृणोलुपम् ४२
स्रोतःसु तक्रशुद्धेषु रसो धातूनुपैति यः
तेन पुष्टिर्बलं वर्णः परं तुष्टिश्च जायते ४३
वातश्लेष्मविकाराणां शतं च विनिवर्तते
मथितं भाजने क्षुद्रबृहतीफललेपिते ४४
निशां पर्युषितं पेयमिच्छद्भिर्गुदजक्षयम्
धान्योपकुञ्चिकाजाजीहपुषापिप्पलीद्वयैः ४५
कारवीग्रन्थिकशठी यवान्यग्नियवानकैः
चूर्णितैर्घृतपात्रस्थं नात्यम्लं तक्रमासुतम् ४६
तक्रारिष्टं पिबेज्जातं व्यक्ताम्लकटु कामतः
दीपनं रोचनं वर्ण्यं कफवातानुलोमनम् ४७

गुदश्वयथुकरड्वर्तिनाशनं बलवर्धनम्
त्वचं चित्रकमूलस्य पिष्टा कुम्भं प्रलेपयेत् ४८
तक्रं वा दधि वा तत्र जातमर्शोहरं पिबेत्
भार्ग्यास्फोतामृतापञ्चकोलेष्वप्येष संविधिः ४९
पिष्टैर्गजकणापाठाकारवी पञ्चकोलकैः
तुम्बर्वजाजीधनिकाबिल्वमध्यैश्च कल्पयेत् ५०
फलाम्लान् यमकस्नेहान् पेयायूषरसादिकान्
एभिरेवौषधैः साध्यं वारि सर्पिश्च दीपनम् ५१
क्रमोऽय भिन्नशकृतां वक्ष्यते गाढवर्चसाम्
स्नेहाढ्यैः सक्तुभिर्युक्तां लवणां वारुणीं पिबेत् ५२
लवणा एव वा तक्रसीधुधान्याम्लवारुणीः
प्राग्भक्तान् यमके भृष्टान् सक्तुभिश्चावचूर्णितान् ५३
करञ्जपल्लवान् खादेद्वातवर्चोनुलोमनान्
सगुडं नागरं पाठां गुडक्षारघृतानि वा ५४
गोमूत्राध्युषितामद्यात्सगुडां वा हरीतकीम्
पथ्याशतद्वयान्मूत्रद्रोणेना मूत्रसङ्क्षयात् ५५
पक्वात् खादेत्समधुनी द्वे द्वे हन्ति कफोद्भवान्
दुर्नामकुष्ठश्वयथुगुल्म मेहोदरकृमीन् ५६
ग्रन्थ्यर्बुदापचीस्थौल्यपाण्डुरोगाढ्यमारुतान्
अजशृङ्गीजटाकल्कमजामूत्रेण यः पिबेत् ५७
गुडवार्ताकभुक् तस्य नश्यन्त्याशु गुदाङ्कुराः
श्रेष्ठारसेन त्रिवृतां पथ्यां तक्रेण वा सह ५८
पथ्यां वा पिप्पलीयुक्तां घृतभृष्टां गुडान्विताम्
अथवा सत्रिवृद्दन्तीं भक्षयेदनुलोमनीम् ५९
हते गुदाश्रये दोषे गुदजा यान्ति सङ्क्षयम्
दाडिमस्वर साजाजीयवानीगुडनागरैः ६०
पाठया वा युतं तक्रं वातवर्चोनुलोमनम्
सीधुं वा गौडमथवा सचित्रकमहौषधम् ६१
पिबेत्सुरां वा हपुषापाठासौवर्चलान्विताम्
दशादिदशकैवृद्धाः पिप्पलीर्द्विपिचुं तिलान् ६२

पीत्वा क्षीरेण लभते बलं देहहुताशयोः
दुःस्पर्शकेन बिल्वेन यवान्या नागरेण वा ६३
एकैकेनापि संयुक्ता पाठा हन्त्यर्शसां रुजम्
सलिलस्य वहे पक्त्वा प्रस्थार्धमभयात्वचाम् ६४
प्रस्थं धात्र्या दशपलं कपित्थानां ततोऽधतः
विशालां रोध्रमरिचकृष्णावेल्लैलवालुकम् ६५
द्विपलांशं पृथक्पादशेषे पूते गुडात्तुले
दत्त्वा प्रस्थं च धातक्याः स्थापयेद्घृतभाजने ६६
पक्षात्स शीलितोऽरिष्टः करोत्यग्निं निहन्ति च
गुदजग्रहणीपाण्डुकुष्ठोदरगरज्वरान् ६७
श्वयथुप्लीहहृद्रोगगुल्म यक्ष्मवमिकृमीन्
जलद्रोणे पचेद्दन्तीदशमूलवराग्निकान् ६८
पालिकान् पादशेषे तु क्षिपेद्गुडतुलां परम्
पूर्ववत्सर्वमस्य स्यादानुलोमितरस्त्वयम् ६९
पचेद्दुरालभाप्रस्थं द्रोणेऽपा प्रासृतैः सह
दन्तीपाठाग्निविजयावासामलकनागरैः ७०
तस्मिन् सिताशतं दद्यात्पादस्थेऽन्यच्च पूर्ववत्
लिम्पेत्कुम्भं तु फलिनीकृष्णाचव्याज्यमाक्षिकैः ७१
प्राग्भक्तमानुलोम्याय फलाम्लं वा पिबेद्घृतम्
चव्यचित्रकसिद्धं वा यवक्षारगुडान्वितम् ७२
पिप्पलीमूलसिद्धं वा सगुडक्षारनागरम्
पिप्पलीपिप्पलीमूलधानकादाडिमैर्घृतम् ७३
दध्ना च साधितं वातशकृन्मूत्रविबन्धनुत्
पलाशक्षारतोयेन त्रिगुणेन पचेद्घृतम् ७४
वत्सकादिप्रतीवापमर्शोघ्नं दीपनं परम्
पञ्चकोलाभयाक्षारयवानीविडसैन्धवैः ७५
सपाठाधान्यमरिचैः सबिल्वैर्दधिमद्घृतम्
साधयेत् तज्जयत्याशु गुदवङ्क्षणवेदनाम् ७६
प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्त्रवम्
पाठाजमोदधनिकाश्वदंष्ट्रापञ्चकोलकैः ७७

सबिल्वैर्दध्नि चाङ्गेरीस्वरसे च चतुर्गुणे
हन्त्याज्यं सिद्धमानाहं मूत्रकृच्छ्रं प्रवाहिकाम् ७८
गुदभ्रंशार्तिगुदज ग्रहणीगदमारुतान्
शिखितित्तिरिलावानां रसानम्लान् सुसंस्कृतान् ७९
दक्षाणां वर्तकानां वा दद्याद्विड्वातसङ्ग्रहे
वास्तुकाग्नित्रिवृद्दन्तीपाठाम्लीकादिपल्लवान् ८०
अन्यच्च कफवातघ्नं शाकं च लघु भेदि च
सहिङ्गु यमके भृष्टं सिद्धं दधिसरैः सह ८१
धनिकापञ्चकोलाभ्यां पिष्टाभ्यां दाडिमाम्बुना
आर्द्रिकायाः किसलयैः शकलैरार्द्रकस्य च ८२
युक्तमङ्गारधूपेन हृद्येन सुरभीकृतम्
सजीरकं समरिचं विडसौवर्चलोत्कटम् ८३
वातोत्तरस्य रूक्षस्य मन्दाग्नेर्बद्धवर्चसः
कल्पयेद्रक्तशाल्यन्नव्यञ्जनं शाकवद्रसान् ८४
गोगोधाछगलोष्ट्राणां विशेषात्क्रव्यभोजिनाम्
मदिरां शार्करं गौडं सीधुं तक्रं तुषोदकम् ८५
अरिष्टं मस्तु पानीयं पानीयं वाऽल्पकं शृतम्
धान्येन धान्यशुण्ठीभ्यां कण्टकारिकयाऽथवा ८६
अन्ते भक्तस्य मध्ये वा वातवर्चोनुलोमनम्
विड्वातकफपित्तानामानुलोम्ये हि निर्मले ८७
गुदे शाम्यन्ति गुदजाः पावकश्चाभिवर्धते
उदावर्तपरीता ये ये चात्यर्थं विरूक्षिताः ८८
विलोमवाताः शूलार्तास्तेष्विष्टमनुवासनम्
पिप्पलद्यं मदनं बिल्वं शताह्वां मधुकं वचाम् ८९
कुष्ठं शठीं पुष्कराख्यं चित्रकं देवदारु च
पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरसंयुतम् ९०
अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम्
गुदनिःसरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम् ९१
कटयूरुपृष्ठदौर्बल्यमानाहं वङ्क्षणाश्रयम्
पिच्छास्रावं गुदे शोफं वातवर्चोविनिग्रहम् ९२

उत्थानं बहुशो यच्च जयेत्तच्चानुवासनात्
निरूहं वा प्रयुञ्जीत सक्षीरं पाञ्चमूलिकम् ९३
समूत्रस्नेहलवणं कल्कैर्युक्तं फलादिभिः
अथ रक्तार्शसां वीक्ष्य मारुतस्य कफस्य वा ९४
अनुबन्धं ततः स्निग्धं रूक्षं वा योजयेद्विमम्
शकृच्छ्यावं खरं रूक्षमधो निर्याति नानिलः ९५
कटयूरुगुदशूलं च हेतुर्यदि च रूक्षणम्
तत्रानुबन्धो वातस्य श्लेष्मणो यदि विट्श्लथा ९६
श्वेता पीता गुरुः स्निग्धा सपिच्छः स्तिमितो गुदः
हेतुः स्निग्धगुरुर्विद्याद्यथास्वं चास्रलक्षणात् ९७
दुष्टेऽस्रे शोधनं कार्यं लङ्घनं च यथाबलम्
यावच्च दोषैः कालुष्यं स्रुतेस्तावदुपेक्षणम् ९८
दोषाणां पाचनार्थं च वह्निसन्धुक्षणाय च
सङ्ग्रहाय च रक्तस्य परं तिक्तैरुपाचरेत् ९९
यत्तु प्रक्षीणदोषस्य रक्तं वातोल्बणस्य वा
स्नेहैस्तत्साधयेद्युक्तैः पानाभ्यञ्जनबस्तिषु १००
यत्तु पित्तोल्बणं रक्तं घर्मकाले प्रवर्तते
स्तम्भनीयं तदेकान्तान्न चेद्वातकफानुगम् १०१
सकफेऽस्रे पिबेत्पाक्यं शुण्ठीकुटजवल्कलम्
किराततिक्तकं शुण्ठी धन्वयासं कुचन्दनम् १०२
दार्वीत्वङ्निम्बसेव्यानि त्वचं वा दाडिमोद्भवाम्
कुटजत्वक्फलं तार्क्ष्यं माक्षिकं घुणवल्लभाम् १०३
पिबेत्तण्डुलतोयेन कल्कितं वा मयूरकम्
तुलां दिव्याम्भसि पचेदार्द्रायाः कुटजत्वचः १०४
नीरसायां त्वचि क्वाथे दद्यात्सूक्ष्मरजीकृतान्
समङ्गाफलिनीमोचरसान् मुष्टयंशकान्समान् १०५
तैश्च शक्रयवान् पूते ततो दर्वीप्रलेपनम्
पक्त्वाऽवलेहं लीढ्वाच तं यथाग्निबलं पिबेत् १०६
पेयां मण्डं पयश्छागं गव्यं वा छागदुग्धभुक्
लेहोऽय शमयत्याशु रक्तातीसारपायुजान् १०७

बलवद्रक्तपित्तं च स्रवदूर्ध्वमधोऽपि वा
कुटजत्वक्तुलां द्रोणे पचेदष्टांशशेषितम् १०८
कल्कीकृत्य क्षिपेत्तत्र तार्क्ष्यशैलं कटुत्रयम्
रोध्रद्वयं मोचरसं बलां दाडिमजां त्वचम् १०९
बिल्वकर्कटिकां मुस्तं समङ्गां धातकीफलम्
पलोन्मितं दशपलं कुटजस्यैव च त्वचः ११०
त्रिंशत्पलानि गुडतो घृतात्पूते च विंशतिः
तत्पक्वं लेहतां यातं धान्ये पक्षस्थितं लिहन् १११
सर्वार्शोग्रहणीदोषश्वास कासान्नियच्छति
रोध्रं तिलान्मोचरसं समङ्गां चन्दनोत्पलम् ११२
पाययित्वाऽजदुग्धेन शालद्यंस्तेनैव भोजयेत्
यष्ट्याह्वपद्मकानन्तापयस्या क्षीरमोरटम् ११३
ससितामधु पातव्यं शीततोयेन तेन वा
रोध्रकट्वङ्गकुटजसमङ्गाशाल्मलीत्वचम् ११४
हिमकेसरयष्ट्याह्वसेव्यं वा तण्डुलाम्बुना
यवानीन्द्रयवाः पाठा बिल्वं शुण्ठी रसाञ्जनम् ११५
चूर्णश्चले हितः शूले प्रवृत्ते चाति शोणिते
दुग्धिकाकण्टकारीभ्यां सिद्धं सर्पिः प्रशस्यते ११६
अथवा धातकीरोध्रकुटजत्वक्फलोत्पलैः
सकेसरैर्यवक्षारदाडिमस्वरसेन वा ११७
शर्कराम्भोजकिञ्जल्कसहितं सह वा तिलैः
अभ्यस्तं रक्तगुदजान् नवनीतं नियच्छति ११८
छागानि नवनीताज्यक्षीरमांसानि जाङ्गलः
अनम्लो वा कदम्लो वा सवास्तुकरसो रसः ११९
रक्तशालि सरो दध्नः षष्टिकस्तरुणी सुरा
तरुणश्च सुरामण्डः शोणितस्यौषधं परम् १२०
पेयायूषरसाद्येषु पलाण्डुः केवलोऽपि वा
स जयत्युल्बणं रक्तं मारुतं च प्रयोजितः १२१
वातोल्बणानि प्रायेण भवन्त्यस्रेऽतिनिःसृते
अर्शांसि तस्मादधिकं तज्जये यत्नमाचरेत् १२२

दृष्ट्वाऽस्रपित्तं प्रबलमबलौ च कफानिलौ
शीतोपचारः कर्तव्यः सर्वथा तत्प्रशान्तये १२३
न चेदेवं शमस्तस्य स्निग्धोष्णैस्तर्पयेत्ततः
रसैःकोष्णैश्च सर्पिर्भिरवपीडकयोजितैः १२४
सेचयेत्तं कवोष्णैश्च कामं तैलपयोघृतैः
यवासकुशकाशानां मूलं पुष्पं च शाल्मलेः १२५
न्यग्रोधोदुम्बराश्वत्थशुङ्गाश्च द्विपलोन्मिताः
त्रिप्रस्थे सलिलस्यैतत्क्षीरप्रस्थे च साधयेत् १२६
क्षीरशेषे कषाये च तस्मिन् पूते विमिश्रयेत्
कल्कीकृतं मोचरसं समङ्गां चन्दनोत्पलम् १२७
प्रियङ्गुं कौटजं बीजं कमलस्य च केसरम्
पिच्छाबस्तिरयं सिद्धः सघृतक्षौद्रशर्करः १२८
प्रवाहिकागुदभ्रंशरक्त स्रावज्वरापहः
यष्ट्याह्वपुण्डरीकेण तथा मोचरसादिभिः १२९
क्षीरद्विगुणितः पक्वो देयः स्नेहोऽनुवासनम्
मधुकोत्पलरोध्राम्बु समङ्गा बिल्वचन्दनम् १३०
चविकाऽतिविषा मुस्तं पाठा क्षारो यवाग्रजः
दार्वीत्वङ्नागरं मांसी चित्रको देवदारु च १३१
चाङ्गेरीस्वरसे सर्पिः साधितं तैस्त्रिदोषजित्
अर्शोतिसारग्रहणीपाण्डु रोगज्वरारुचौ १३२
मूत्रकृच्छ्रे गुदभ्रंशे बस्त्यानाहे प्रवाहणे
पिच्छास्रावेऽर्शसां शूले देयं तत्परमौषधम् १३३
व्यत्यासान्मधुराम्लानि शीतोष्णानि च योजयेत्
नित्यमग्निबलापेक्षी जयत्यर्शःकृतान् गदान् १३४
उदावर्तार्तमभ्यज्य तैलैः शीतज्वरापहैः
सुस्निग्धैः स्वेदयेत्पिण्डैर्वर्तिमस्मै गुदे ततः १३५
अभ्यक्तां तत्कराङ्गुष्ठसन्निभामनुलोमनीम्
दद्याच्छ्यामात्रिवृद्दन्तीपिप्पलीनीलिनीफलैः १३६
विचूर्णितैर्द्विलवणैर्गुड गोमूत्रसंयुतैः
तद्वन्मागधिकाराठगृहधूमैः ससर्षपैः १३७

एतेषामेव वा चूर्णं गुदे नाड्या विनिर्धमेत्
तद्विघाते सुतीक्ष्णं तु बस्तिं स्निग्धं प्रपीडयेत् १३८
ऋजू कुर्याद्गुदशिराविण्मूत्रमरुतोऽस्य सः
भूयोऽनुबन्धे वातघ्नैर्विरेच्यः स्नेहरेचनैः १३९
अनुवास्यश्च रौक्ष्याद्धि सङ्गो मारुतवर्चसोः
त्रिपटुत्रिकटुश्रेष्ठादन्त्यरुष्करचित्रकम् १४०
जर्जरं स्नेहमूत्राक्तमन्तर्धूमं विपाचयेत्
शरावसन्धौ मृल्लिप्ते क्षारः कल्याणकाह्वयः १४१
स पीतः सर्पिषा युक्तो भक्ते वा स्निग्धभोजिना
उदावर्तविबन्धार्शोगुल्मपाण्डूदरकृमीन् १४२
मूत्रसङ्गाश्मरीशोफ हृद्रोगग्रहणीगदान्
मेहप्लीहरुजानाहश्वासकासांश्च नाशयेत् १४३
सर्वं च कुर्याद्यत्प्रोक्तमर्शसां गाढवर्चसाम्
द्रोणेऽपा पूतिवल्कद्वितुलमथ पचेत्पादशेषे च तस्मिन्
देयाऽशीतिर्गुडस्य प्रतनुकरजसो व्योषतोऽष्टौ पलानि
एतन्मासेन जातं जनयति परमामूष्मणः पक्तिशक्तिंशुक्तं कृत्वाऽनुलोम्यं
प्रजयति गुदजप्लीहगुल्मोदराणि १४४
पचेत्तुलां पूतिकरञ्जवल्काद् द्वे मूलतश्चित्रककण्टकार्योः
द्रोणत्रयेऽपा चरणावशेषेपूते शतं तत्र गुडस्य दद्यात् १४५
पलिकं च सुचूर्णितं त्रिजातत्रिकटुग्रन्थिकदाडिमाश्मभेदम्
पुरपुष्करमूलधान्यचव्यं हपुषामार्द्रकमम्लवेतसं च १४६
शीतीभूतं क्षौद्रविंशत्युपेतमार्द्रद्राक्षाबीजपूरार्द्रकैश्च
युक्तं कामं गण्डिकाभिस्तथेक्षोः सर्पिःपात्रे मासमात्रेण जातम् १४७
चुक्रं क्रकचमिवेदं दुर्नाम्नां वह्निदीपनं परमम्
पाण्डुगरोदरगुल्मप्लीहानाहाश्मकृच्छ्रघ्नम् १४८
द्रोणं पीलुरसस्यवस्त्रगलितं न्यस्तं हविर्भाजने
युञ्जीत द्विपलैर्मदामधुफला खर्जूरधात्रीफलैः
पाठामाद्रिदुरालभाम्ल विदुल व्योषत्वगेलोल्लकैः
स्पृक्काकोललवङ्गवेल्लचपलामूलाग्निकैःपालिकैः १४९
गुडपलशतयोजितं निवाते निहितमिदं प्रपिवंश्च पक्षमात्रात्

निशमयति गुदाङ्कुरान् सगुल्माननलबलं प्रबलं करोति चाशु १५०
एकैकशो दशपले दशमूलकुम्भ
पाठाद्वयार्कघुण वल्लभकट् फलानाम्
दग्धे स्रुतेऽनु कलशेन जलेन पक्वेपादस्थिते गुडतुलां पलपञ्चकं च १५१
दद्यात्प्रत्येकं व्योषचव्या भयानां
वह्नेर्मुष्टी द्वे द्वेयवक्षारतश्च
दर्वीमालिम्पन् हन्ति लीढो गुडोऽय गुल्मप्लीहार्शः कुष्ठमेहाग्निसादान् १५२
तोयद्रोणे चित्रकमूलतुलार्धं
साध्यंयावत्पाद दलस्थमथेदम्
अष्टौ दत्वा जीर्णगुडस्य पलानि
क्वाथ्यंभूयः सान्द्रतया सममेतत् १५३
त्रिकटुकमिसिपथ्याकुष्टमुस्तावराङ्ग
कृमिरिपुदहनैला चूर्णकीर्णोऽवलेहः
जयति गुदज कुष्ठप्लीहगुल्मोदराणि प्रबलयति हुताशं शश्वदभ्यस्यमानः
१५४
गुडव्योषवरा वेल्लतिलारुष्करचित्रकैः
अर्शांसि हन्ति गुलिका त्वग्विकारं च शीलिता १५५
मृल्लिप्तं सौरणं कन्दं पक्त्वाऽग्नौ पुटपाकवत्
अद्यात्सतैललवणं दुर्नामविनिवृत्तये १५६
मरिचपिप्पलिनागरचित्रकान् क्रमविवर्धितभागसमाहृतान्
शिखिचतुर्गुणसूरणयोजितान् कुरुगुडेन गुडान् गुदजच्छिदः १५७
चूर्णीकृताः षोडश सूरणस्यभागास्ततोऽधेन च चित्रकस्य
महौषधाद्द्वौ मरिचस्य चैकोगुडेन दुर्नामजयाय पिण्डी १५८
पथ्यानागरकृष्णाकरञ्जवेल्लाग्निभिः सितातुल्यैः
वडवामुख इव जरयति बहुगुर्वपि भोजनं चूर्णः १५९
कलिङ्गलाङ्गलीकृष्णावह्न्य पामार्गतण्डुलैः
भूनिम्बसैन्धवगुडैर्गुडा गुदजनाशनाः १६०
लवणोत्तमवह्निकलिङ्गयवांश्चिरिबिल्व महापिचुमन्दयुतान्
पिब सप्तदिनं मथितालुडितान् यदि मर्दितुमिच्छसि पायुरुहान् १६१
शुष्केषु भल्लातकमग्र्यमुक्तं भैषज्यमार्द्रेषु तु वत्सकत्वक्

सर्वेषु सर्वर्तुषु कालशेयमर्शःसु बल्यं च मलापहं च १६२
भित्त्वा विबन्धाननुलोमनाय यन्मारुतस्याग्निबलाय यच्च
तदन्नपानौषधमर्शसेन सेव्यं विवर्ज्यं विपरीतमस्मात् १६३
अर्शोतिसारग्रहणीविकाराः प्रायेण चान्योन्य निदान भूताः
सन्नेऽनले सन्ति न सन्ति दीप्ते रक्षेदतस्तेषु विशेषतोऽग्निम् १६४
इति श्रीवैद्यपतिसिंहगुप्तश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थानेऽशश्चिकित्सितं नामाष्टमोऽध्यायः ८

नवमोऽध्यायः

अथातोऽतीसारचिकित्सितं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
अतीसारोहि भूयिष्ठं भवत्यामाशयान्वितः
हत्वाऽग्नि वातजेऽप्यस्मात्प्राक् तस्मिंल्लङ्घनं हितम् १
शूलानाहप्रसेकार्तं वामयेदतिसारिणम्
दोषाः सन्निचिता ये च विदग्धाहारमूर्च्छिताः २
अतीसाराय कल्पन्ते तेषूपेक्षैवभेषजम्
भृशोत्क्लेशप्रवृत्तेषु स्वयमेव चलात्मसु ३
न तु सङ्ग्रहणं योज्यं पूर्वमामातिसारिणि
अपि चाध्मानगुरुताशूलस्तैमित्यकारिणि ४
प्राणदा प्राणदा दोषे विबद्धे सम्प्रवर्तिनी
पिबेत्प्रक्वथितास्तोये मध्यदोषो विशोषयन् ५
भूतीकपिप्पलीशुण्ठी वचाधान्यहरीतकीः
अथवा बिल्वधनिकामुस्तनागरवालकम् ६
बिडपाठावचापथ्याकृमिजिन्नागराणि वा
शुण्ठीघनवचामाद्रीबिल्ववत्सकहिङ्गु वा ७
शस्यते त्वल्पदोषाणामुपवासोऽतिसारिणाम्
वचाप्रतिविषाभ्यां वा मुस्तापर्पटकेन वा ८
ह्रीबेरनागराभ्यां वा विपक्वं पाययेज्जलम्
युक्तेऽन्नकाले क्षुत्क्षामं लघ्वन्नं प्रतिभोजयेत् ९
तथा स शीघ्रं प्राप्नोति रुचिमग्निबलं बलम्

तक्रेणावन्तिसोमेन यवाग्वा तर्पणेन वा १०
सुरया मधुना वाऽथ यथासात्म्यमुपाचरेत्
भोज्यानि कल्पयेदूर्ध्वं ग्राहिदीपनपाचनैः ११
बालबिल्वशठीधान्यहिङ्गुवृक्षाम्लदाडिमैः
पलाशहपुषाजाजीयवानीबिडसैन्धवैः १२
लघुना पञ्चमूलेन पञ्चकोलेन पाठया
शालिपर्णीबलाबिल्वैः पृश्निपर्ण्या च साधिता १३
दाडिमाम्ला हिता पेया कफपित्ते समुल्बणे
अभयापिप्पलीमूलबिल्वैर्वातानुलोमनी १४
विबद्धं दोषबहुलो दीप्ताग्निर्योऽतिसार्यते
कृष्णाविडङ्गत्रिफलाकषायैस्तं विरेचयेत् १५
पेयां युञ्ज्याद्विरिक्तस्य वातघ्नैर्दीपनैः कृताम्
आमे परिणते यस्तु दीप्तेऽग्नावुपवेश्यते १६
सफेनपिच्छं सरुजं सविबन्धं पुनः पुनः
अल्पाल्पमल्पशमलं निर्विड् वा सप्रवाहिकम् १७
दधितैलघृतक्षीरैः स शुण्ठीं सगुडां पिबेत्
स्विन्नानि गुडतैलेन भक्षयेद्बदराणि वा १८
गाढविड् विहितैः शाकैर्बहुस्नेहैस्तथा रसैः
क्षुधितं भोजयेदेनं दधिदाडिमसाधितैः १९
शाल्योदनं तिलैर्माषैर्मुद्गैर्वा साधु साधितम्
शठ्या मूलकपोतायाः पाठायाः स्वस्तिकस्य वा २०
सूषायवानीकर्कारुक्षीरिणीचिर्भटस्य वा
उपोदकाया जीवन्त्या वाकुच्या वास्तुकस्य वा २१
सुवर्चलायाश्चुञ्चोर्वा लोणिकाया रसैरपि
कूर्मवर्तकलोपाकशिखितित्तिरिकौक्कुटैः २२
बिल्वमुस्ताक्षिभैषज्य धातकीपुष्पनागरैः
पक्वातीसारजित्तक्रे यवागूर्दाधिकी तथा २३
कपित्थकच्छुराफञ्जी यूथिकावटशेलुजैः
दाडिमीशणकार्पासीशाल्मलीनां च पल्लवैः २४
कल्को बिल्वशलाटूनां तिलकल्कश्च तत्समः

दध्नः सरोऽम्ल सस्नेहः खलो हन्ति प्रवाहिकाम्
मरिचं धनिकाऽजाजी तिन्तिडीकं शठी विडम्
दाडिमं धातकी पाठा त्रिफला पञ्चकोलकम् २६
यावशूकं कपित्थाम्रजम्बूमध्यं सदीप्यकम्
पिष्टैः षड्गुणबिल्वैस्तैर्दध्नि मुद्गरसे गुडे २७
स्नेहे च यमके सिद्धः खलोऽयमपराजितः
दीपनः पाचनो ग्राही रुच्यो विम्बिशिनाशनः २८
कोलानां बालबिल्वानां कल्कैः शालियवस्य च
मुद्गमाषतिलानां च धान्ययूषं प्रकल्पयेत् २९
एकध्यं यमके भृष्टं दधिदाडिमसारिकम्
वर्चःक्षये शुष्कमुखं शाल्यन्नं तेन भोजयेत् ३०
दध्नः सरं वा यमके भृष्टं सगुडनागरम्
सुरां वा यमके भृष्टां व्यञ्जनार्थं प्रयोजयेत् ३१
फलाम्लं यमके भृष्टं यूषं गृञ्जनकस्य वा
भृष्टान्वा यमके सक्तून् खादेद्व्योषावचूर्णितान् ३२
माषान् सुसिद्धांस्तद्वद्वा घृतमण्डोपसेवनान्
रसं सुसिद्धपूतं वा छागमेषान्तराधिजम् ३३
पचेद्दाडिमसाराम्लं सधान्यस्नेहनागरम्
रक्तशाल्योदनं तेन भुञ्जानः प्रपिबंश्च तम् ३४
वर्चःक्षयकृतैराशु विकारैः परिमुच्यते
बालबिल्वं गुडं तैलं पिप्पलद्यं विश्वभेषजम् ३५
लिह्याद्वाते प्रतिहते सशूलः सप्रवाहिकः
वल्कलं शाबरं पुष्पं धातक्या बदरीदलम् ३६
पिबेद्दधिसरक्षौद्रकपित्थ स्वरसाप्लुतम्
विवद्धवातवर्चास्तु बहुशूलप्रवाहिकः ३७
सरक्तपिच्छस्तृष्णार्तः क्षीरसौहित्यमर्हति
यमकस्योपरि क्षीरं धारोष्णं वा प्रयोजयेत् ३८
शृतमेरण्डमूलेन बालबिल्वेन वा पुनः
पयस्युत्क्वाथ्य मुस्तानां विंशतिं त्रिगुणेऽम्भसि ३९
क्षीरावशिष्टं तत्पीतं हन्यादामं सवेदनम्

पिप्पल्याः पिबतः सूक्ष्मं रजो मरिचजन्म वा ४०
चिरकालानुषक्ताऽपि नश्यत्याशु प्रवाहिका
निरामरूपं शूलार्तं लङ्घनाद्यैश्च कर्षितम् ४१
रूक्षकोष्ठमपेक्ष्याग्निं सक्षारं पाययेद् घृतम्
सिद्धं दधिसुरामण्डे दशमूलस्य चाम्भसि ४२
सिन्धूत्थपञ्चकोलाभ्यां तैलं सद्योऽतिनाशनम्
षड्भिः शुण्ठ्याः पलैर्द्वाभ्यां द्वाभ्यां ग्रन्थ्यग्निसैन्धवात् ४३
तैलप्रस्थं पचेद्दध्ना निःसारकरुजापहम्
एकतो मांसदुग्धाज्यं पुरीषग्रहशूलजित् ४४
पानानुवासनाभ्यङ्गप्रयुक्तं तैलमेकतः
तद्धि वातजितामग्र्यं शूलं च विगुणोऽनिलः ४५
धात्वन्तरोपमर्देद्धश्चलो व्यापी स्वधामगः
तैलं मन्दानलस्यापि युक्त्या शर्मकरं परम् ४६
वाय्वाशये सतैले हि विम्बिसी नावतिष्ठते
क्षीणे मले स्वायतनच्युतेषु
दोषान्तरेष्वीरण एकवीरे
को निष्टनन्प्राणिति कोष्ठशूली
नान्तर्बहिस्तैलपरो यदि स्यात् ४७
गुदरुग्भ्रंशयोर्युञ्ज्यात्सक्षीरं साधितं हविः ४८
रसे कोलाम्लचाङ्गेर्योर्दध्नि पिष्टे च नागरे
तैरेव चाम्लैः संयोज्य सिद्धं सुश्लक्ष्णकल्कितैः ४९
धान्योषणविडाजाजीपञ्च कोलकदाडिमैः
योजयेत्स्नेहबस्तिं वा दशमूलेन साधितम् ५०
शठीशताह्वाकुष्ठैर्वा वचया चित्रकेण वा
प्रवाहणे गुदभ्रंशे मूत्राघाते कटिग्रहे ५१
मधुराम्लैः शृतं तैलं घृतं वाऽप्यनुवासनम्
प्रवेशयेद्गुदं ध्वस्तमभ्यक्तं स्वेदितं मृदु ५२
कुर्याच्च गोःफणाबन्धं मध्यच्छिद्रेण चर्मणा
पञ्चमूलस्य महतः क्वाथं क्षीरे विपाचयेत् ५३
उन्दुरुं चान्त्ररहितं तेन वातघ्नकल्कवत्

तैलं पचेद्गुदभ्रंशं पानाभ्यङ्गेन तज्जयेत् ५४
पैत्ते तु सामे तीक्ष्णोष्णवर्ज्यं प्रागिव लङ्घनम्
तृड्वान् पिबेत् षडङ्गाम्बु सभूनिम्बं ससारिवम् ५५
पेयादि क्षुधितस्यान्नमग्निसन्धुक्षणं हितम्
बृहत्यादिगणाभीरुद्विबला शूर्पपर्णिभिः ५६
पाययेदनुबन्धे तु सक्षौद्रं तण्डुलाम्भसा
कुटजस्य फलं पिष्टं सवल्कं सघुणप्रियम् ५७
पाठावत्सकवीजत्वग्दार्वीग्रन्थिकशुण्ठि वा
क्वाथं वाऽतिविषाविल्ववत्सकोदीच्यमुस्तजम् ५८
अथवाऽतिविषामूर्वा निशेन्द्रयवतार्क्ष्यजम्
समध्वतिविषाशुण्ठीमुस्तेन्द्रयवकट्फलम् ५९
पलं वत्सकबीजस्य श्रपयित्वा रसं पिबेत्
यो रसाशी जयेच्छीघ्रं स पैत्तं जठरामयम् ६०
मुस्ताकषायमेवं वा पिबेन्मधुसमायुतम्
सक्षौद्रं शाल्मलीवृन्तकषायं वा हिमाह्वयम् ६१
किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम्
कटङ्कटेरी ह्रीबेरं बिल्वमध्यं दुरालभा ६२
तिला मोचरसं रोध्रं समङ्गाकमलोत्पलम्
नागरं धातकीपुष्पं दाडिमस्य त्वगुत्पलम् ६३
अर्धश्लोकैः स्मृता योगाः सक्षौद्रास्तण्डुलाम्बुना
निशेन्द्रयवरोध्रैलाक्वाथः पक्वातिसारजित् ६४
रोध्राम्बष्ठाप्रियङ्ग्वादिगणांस्तद्वत् पृथक् पिबेत्
कट्वङ्गवल्कयष्ट्याह्वफलिनीदाडिमाङ्कुरैः ६५
पेयाविलेपीखलकान् कुर्यात्सदधिदाडिमान्
तद्वद्दधित्थविल्वाम्रजम्बुमध्यैः प्रकल्पयेत् ६६
अजापयः प्रयोक्तव्यं निरामे तेन चेच्छमः
दोषाधिक्यान्न जायेत बलिनं तं विरेचयेत् ६७
व्यत्यासेन शकृद्रक्तमुपवेश्येत योऽपि वा
पलाशफलनिर्यूहं युक्तं वा पयसा पिबेत् ६८
ततोऽनु कोष्णं पातव्यं क्षीरमेव यथाबलम्

प्रवाहिते तेन मले प्रशाम्यत्युदरामयः ६९
पलाशवत्प्रयोज्या वा त्रायमाणा विशोधनी
संसर्ग्यां क्रियमाणायां शूलं यद्यनुवर्तते ७०
स्रुतदोषस्य तं शीघ्रं यथावह्न्यनुवासयेत्
शतपुष्पावरीभ्यां च विल्वेन मधुकेन च ७१
तैलपादं पयोयुक्तं पक्वमन्वासनं घृतम्
अशान्तावित्यतीसारे पिच्छाबस्तिः परं हितः ७२
परिवेष्ट्य कुशैरार्द्रैरार्द्रवृन्तानि शाल्मलेः
कृष्णमृत्तिकयाऽलिप्य स्वेदयेद्गोमयाग्निना ७३
मृच्छोषे तानि सङ्क्षुद्य तत्पिण्डं मुष्टिसम्मितम्
मर्दयेत्पयसः प्रस्थे पूतेनास्थापयेत्ततः ७४
नतयष्ट्याह्वकल्काज्यक्षौद्रतैलवताऽनु च
स्नातो भुञ्जीत पयसा जाङ्गलेन रसेन वा ७५
पित्तातिसारज्वरशोफगुल्मसमीरणास्रग्रहणीविकारान्
जयत्ययं शीघ्रमतिप्रवृत्तिं विरेचनास्थापनयोश्च बस्तिः ७६
फाणितं कुटजोत्थं च सर्वातीसारनाशनम्
वत्सकादिसमायुक्तं साम्बष्ठादि समाक्षिकम् ७७
नीरुङ्निरामं दीप्ताग्नेरपि सास्रं चिरोत्थितम्
नानावर्णमतीसारं पुटपाकैरुपाचरेत् ७८
त्वक्पिण्डाद्दीर्घवृन्तस्य श्रीपर्णीपत्रसंवृतात्
मृल्लिप्तादग्निना खिन्नाद्रसं निष्पीडितं हिमम् ७९
अतीसारी पिबेद्युक्तं मधुना सितयाऽथवा
एवं क्षीरिद्रुमत्वग्भिस्तत्प्ररोहैश्च कल्पयेत् ८०
कट्वङ्गत्वग्घृतयुता स्वेदिता सलिलोष्मणा
सक्षौद्रा हन्त्यतीसारं बलवन्तमपि द्रुतम् ८१
पित्तातिसारी सेवेते पित्तलान्येव यः पुनः
रक्तातिसारं कुरुते तस्य पित्तं सतृड्ज्वरम् ८२
दारुणं गुदपाकं च तत्र छागं पयो हितम्
पद्मोत्पलसमङ्गाभिः शृतं मोचरसेन च ८३
सारिवायष्टिरोध्रैर्वा प्रसवैर्वा वटादिजैः